॥ ओ३म् ॥
परमं यो महत्तेजः परमं
यो महत्तपः ।
परमं यो महद्ब्रह्म
परमं यः परायणम्॥९॥
पवित्राणां पवित्रं यो मङ्गलानां
च मङ्गलम् ।
दैवतं देवतानां च भूतानां
योऽव्ययः पिता ॥१०॥
(नीतिशतकम्)

RNI No. : DELSAN/2011/38660 ISSN 2321-4937 DL(E)-20/5534/2018-20

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत-संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः: www.sanskritsamvad.com मूल्यम्-रू. १०/-

यतः सर्वाणि
भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति
पुनरेव युगक्षये ॥११॥
तस्य लोकप्रधानस्य
जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे
शृणुश्‌ पापभयापहम् ॥१२॥
(नीतिशतकम्)

卐 वर्षम्-१० 卐 अंकः-१२ (२२८) 卐 १६ दिसम्बरः २०२० तः ३१ दिसम्बरमासः २०२० पर्यन्तम् 卐 विक्रमसंवत्-२०७७ 卐 सृष्टिसंवत्-१,९६,०८,५३,११८ 卐 पृष्ठम्-८


## देववाणीपरिषदः पञ्चचत्वारिंशः स्थापनादिवससमारोहः

**नवदेहली।** 13.12.2020 तमे दिनाङ्के दिल्लीस्थया देववाणीपरिषदा स्वीयः पञ्चचत्वारिंशः स्थापनादिवससमारोहः समामानितः । कार्यक्रमोऽयं दिल्ल्यां स्थानत्रये समनुष्ठितः । देववाणीपरिषदः मुख्यालये रमालये, राजीवनगरस्थे श्रीनारायणधाम्नि, रोहिणीस्थायां स्वरवेण्यां च विविधाः कार्यक्रमाः



समनुष्ठीयन्त। सुश्रीनिधितिवारीकृतेन ऋग्वेदीयमङ्गलाचरणेन कार्यक्रमस्य शुभारम्भोऽभूत् । एतदनु वरदशुक्लः, शिवाङ्गीशुक्ला, शुभाङ्गी शुक्ला रम्या शुक्ला च श्लोकपाठम् अकुर्वन् । एतदनु सुश्रीः ऋचा झा श्रीहरिस्तोत्रम् अगायत् । अत ऊर्ध्वं परिषदध्यक्षेण आचार्येण रमाकान्तशुक्लेन

**शेषभागःद्वितीयेपुटे**

## मुख्यमन्त्री अखिलभारतीय-आयुर्विज्ञानसंस्थाने, गोरखपुरे त्रिदिवसीयसंगोष्ठीस्वस्थपूर्वि-उत्तरप्रदेशस्य शुभारम्भम् अकरोत्

उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः अद्य अखिलभारतीय-आयुर्विज्ञानसंस्थाने, गोरखपुरे आयोजितायाः त्रिदिवसीयसंगोष्ठी-स्वस्थपूर्वि-उत्तरप्रदेशस्य' शुभारम्भं कृतवान् । अस्मिन्नवसरे तेन 'ई-आरोग्य एप'- उद्घाटनस्य स्मारिकायाश्च विमोचनं कृतम् । तेनोक्तं यत् एतत् एप पञ्जीकरणाय, डिजिटलख्रमानधनप्रेषणाय, डिजिटल-अभिलेखाय च उपयोगि भविष्यति । अखिलभारतीय-आयुर्विज्ञानसंस्थानेन 'स्वस्थपूर्वि-उत्तरप्रदेश-एकः उपक्रमः' संगोष्ठिनिमित्तं




शुभकामनाः वर्धापनानि च ददता तेनोक्तं यत् अखिलभारतीय-आयुर्विज्ञानसंस्थानं स्वास्थ्यस्य चिकित्सायाश्च क्षेत्रे स्वीया महत्त्वपूर्णा भूमिका ज्ञास्यते । अग्रिमवर्षे अखिलभारतीय-आयुर्विज्ञानसंस्थानं, गोरखपुरं जनतायाः कृते पूर्णरूपेण समर्पितं करिष्यते।

मुख्यमन्त्रिणा उक्तं यत् प्रदेशसर्वकारेण स्वास्थ्यसेवानां विस्तारीकरणं प्रति निरन्तरं कार्यं क्रियते । स्वास्थ्यसंसाधनानि च वर्ध्यन्ते । स्वास्थ्यस्य आधारिकसंरचनाम् अपि तावत् वर्ध्यते । प्रदेशे चिकित्साविश्वविद्यालयानां श्रृङ्खलां वर्धते । गोरखपुरे चिकित्साविश्वविद्यालये पूर्व-अपेक्षया अतीव उत्तमं सौविध्यं उपलप्स्यते । अत्र नूतनाः संस्थाः स्थापिताः । विशिष्टव्यवस्थाचिकित्सालयेन कोरोनाकालखण्डे स्वकीयं उत्तमं सौविध्यं प्रदत्तम् । तेनोक्तं यत् रोगाणां सर्वतो वृहदुपचारस्तावद्रक्षणमेव ।

मुख्यमन्त्रिणा उक्तं यत् मस्तिष्क-कलाशोधं प्रदेशसर्वकारेण नियन्त्रयितुं टीकया साकमेव अन्तर्विभागीयं समन्वयनं कृत्वा इदं नियन्त्रितम् । सम्बद्धविभागैः सञ्चालिताभियानस्य अन्तर्गतं अनेन सह संयुज्य सम्यक्परिणामः दत्तः । स्वच्छभारतमिशनान्तर्गतं प्रत्येकं गृहं शौचालयस्य स्वच्छतायाश्च माध्यमेन मस्तिष्क-कलाशोधं पूर्णरूपेण नियन्त्रितं कृतम् । शुद्धपेयजलस्य

**शेषभागःद्वितीयेपुटे**

## शल्यचिकित्सा विश्वहिताय आयुर्वेदेन दत्तम् अभूतपूर्वदानम् : आचार्य बालकृष्णः



हरिद्वारम् , ११/१२/२०२०। तत्र आचार्येणोक्तं शल्यचिकित्साज्ञानप्रसारयता यत् शल्यतन्त्रं (सर्जरी) आयुर्वेदे वर्णिता एका प्राचीनविधा । प्राचीने अष्टाङ्गायुर्वेदे मुख्यचिकित्साविधारूपेण उल्लेखिता । सुश्रुतसंहितायां च वर्णिता।तद्यथा- शल्यं, शालक्यं, कायचिकित्सा, भूतविद्या, कौमारभृत्यं, अगदतंत्रा, रसायनतंत्रा, वाजीकरणतंत्राम् इति।। ;सु.स. 1/7द्ध सुश्रुतसंहितायां शल्यतन्त्रं विशद्रूपेण उल्लेखितं तत्र शल्यं नाम? विविध्तृणम् , काष्ठं, पाषाणः, पांशु, लोहः, लोष्टः, अस्थिः, बालः ;केशद्धः, नखः, पूयः, ड्डावः, दुष्टव्रणः, अन्तर्गर्भः, शल्यो(रणार्थ, यंत्रा-शस्त्रा-क्षार-अग्नि-प्रणिधन व्रणविनिश्च्यार्थ च।। -सु0सं0 1/। वर्तमानकाले शल्ये प्रयुक्तं अष्टविधशस्त्रकर्म आचार्य सुश्रुतस्य कृपा वर्तते।


आयुर्वेदोक्ते शल्यकर्मणि अनेकसूक्ष्मता वर्णिता । यानि छेदनं (Excision), भेदनं (Incision), लेखनं (Scrapping), वेघनं (Puncturing), एषणं (Probing), आहरणं (Extraction), विस्रावणं (Drainage), सीवनं (Suturing)। इत्यष्टकर्मद्वारा पूर्णशल्यक्रिया क्रियते। संधनक्रियायां (प्लास्टिक सर्जरी) जिह्वायाः, नेत्रयोः, कर्णयोः, दन्तानां, नासिकायाः तथा मुखरोगाणां शल्यचिकित्सा आचार्यसुश्रुतद्वारा वर्णिता।

## वैष्णवाचार्याय श्रीनिवाससंस्कृतविद्यापीठस्य संस्थापकाय संरक्षकाय च अश्रुपूरितश्रद्धाञ्जलिः



समग्रे भारते द्वितीयपाणिनिनाम्ना प्रख्यातः सुपूजितः नेपालदेशीयः विद्वान्, मनीषी,श्रीजगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयस्य भूतपूर्वः संस्कृतविभागाध्यक्षः ,व्याकरणाचार्यः श्रीनिवाससंस्कृतविद्यापीठस्य संस्थापकः संरक्षकः, नैकेषां गुरुकुलानां सञ्चालकः नैकेषाञ्च व्याकरणादिग्रन्थानां प्रणेता, व्याकरणटीकाकारः, विद्वन्मान्यः, वैष्णवाचार्यः, भगवदुपासकः विद्वतसमाजपूजनीयः मान्य गोविन्दाचार्यः ३०/११/२०२० तमे दिनाङ्के गोलोकं गतः। येन संस्कृतजनतः अपूरणीया क्षतिः अभवत। आचार्यस्य अमुष्य सन्निध्ये शास्त्राणि अधीत्य नैके छात्राः महाविद्यालयेषु , विश्वविद्यालयेषु च अध्यापयन्तः सन्ति। अवसरेस्मिन् नैकैः विद्वद्भिस्तत्र स्वीयश्रद्धाञ्जलिः समर्पिता।

## ऋषिभक्ताय दानवीराय महायशसे धर्मपालमहोदयाय अश्रुपूरितश्रद्धाञ्जलिः




नवदेहली। प्रसिद्धः उद्योगपतिः विख्यातः समाजसेवी पद्मभूषणः महाशयः धर्मपालः गुरुवारे 3:12 20 दिनाङ्के प्रातः 5:38 वादने निधनं गतः । सः 98 वर्षीयः आसीत् स गुरुवासरे 2:00 तस्य अन्तिमसंस्कारः विहितः। तत्पुत्र श्रीमान् राजीव गुलाटी तदन्तिमसंस्कारं सम्पादितवान्। महाशयः धर्मपालः कोरोना संक्रमितः सन् एकमासपूर्वं जनकपुरीस्थितमाताचानन देवीचिकित्सालये चिकित्सां कुर्वन् आसीत। तत्र प्रातः मंगलवासरे प्रातः सहसा हृदयाघातेन सः दिवङ्गतः।

महाशयधर्मपालस्य निधनेन आर्यसमाजस्य वैदिकधर्मप्रचारसम्बद्धगतिविधीनां च महती क्षतिः अभूत् स देशस्य अनेके प्रबुद्धनागरिकाः संस्थाश्च तन्निधनं प्रति श्रद्धाञ्जलिं समर्पितवन्तःस

## वाग्योगपीठद्वारा पद्मश्रीभागिरथीत्रिपाठिनः संस्मृतौ विविधसम्मानसमारोहः समायोजितः

तत्र वाराणस्याः 40 वर्षेभ्यः संस्कृतं,योग-तन्त्रम्, अध्यात्मं साहित्यं सांस्कृतिश्चेत्यादीनां विश्वपटले ज्योतिं प्रकाशयितुं संस्थावाग्योगचेतनापीठशिवालाद्वारा १२/१२/२०२० दिनाङ्के




श्रीपार्श्वनाथविद्यापीठकरौंदी-वाराणस्यां विश्वप्रसिद्धसंस्कृत विदुषः भाषावैज्ञानिकस्य, पद्मश्रीमहामहोपाध्यायस्य भागीरथ प्रसाद त्रिपाठिनः '(वागीश शास्त्री)' 67 वर्षाणां साहित्यिकसाधनाम् उरीकृत्य अभिनन्दनग्रन्थस्य वाग्योग वैभवस्य श्लोकार्पणकार्यक्रमस्य' मुख्यातिथिः माननीयः इन्द्रेश कुमारः, विशिष्टातिथिः राजेश नैथानी, सारस्वतातिथि प्रो राजाराम शुक्लः, मुख्यवक्ता प्रो. जितेंद्र नाथ मिश्रश्च । तत्र अभिनवग्रन्थस्य प्रधानसंपादकः प्रो प्रभुनाथ द्विवेदी वर्तते। 'वाग्योग-सम्मान समारोहः' विभिन्नविधाओंवाग्योगसम्मानं विगतचतुर्वर्षेभ्यः लम्बितम् आसीत। तत्र समारोहस्य' मुख्य अतिथिप्रख्यातचिन्तकः, विचारकश्च अखिलभारतीय कार्यकारिणीसदस्यः ,राष्टियस्वयंसेवकसंघस्य माननीयः इन्द्रेश कुमारः आसीत्।

अस्मिन् वर्षे प्रारब्धायाः वाग्योगशृंखलायाः सर्वोच्चराष्ट्ररत्नसम्मानं उत्तराखंडस्य संस्कृतसाधकाय श्रीमते कृष्ण कुमाराय (आयुर्वेदलंकारः) मरणोपरान्तं दत्तम्।

वाग्योगनारीप्रतिभासम्मानं ग्रहीत्री नारी शक्ति श्रीमती अंकिता खत्री, डॉ विभा जोशी, कु.मालविका तिवारी, डॉ रचना शर्मा, डॉ चंद्रकांता राय, डॉ ऋतु गर्गश्च तत्र समुपस्थिताः ।

## महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयस्य कुरुक्षेत्रविकासपरिषदश्च संयोजने अन्ता राष्ट्रिय गीतामहोत्सवः आयोजयिष्यते-श्रेयांश द्विवेदी

महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयस्य आह्वाहनेन देशस्य 17 संस्कृतविश्वविद्यालयानां कुलपतिभिः सह महामहिमराज्यपालस्य सचिवः अनुपमामहोदयया समम् ऑनलाइनगोष्ठी अभूत्तत्र अन्ता राष्ट्रियगीतामहोत्सवः आयोजितः ,तत्प्रचारप्रसारनिमित्तं विचार-विमर्शश्च कृतः ।



अनुपमावर्यया प्रोक्तं प्रदेशसर्वकारः कुरुक्षेत्रविकासपरिषद्द्वारा विशिष्टोऽयं कार्यक्रमः आयोजितः।।कुलपतिः डा. श्रेयांश द्विवेदी आयोजनाय संस्कृतविश्वविद्यालयस्य कुरुक्षेत्रविकासपरिषदश्च सहकारं प्रोक्तवान् । यत्र वेदमन्त्राणां श्लोकानां समुच्चारणं, गीतापाठः, योगः, अभिनय-नृत्यं ,अन्याः प्रतियोगिताश्च व्याख्यानेन सह सम्मिलिताः। तत्र कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालय-रामटेकस्य कुलपतिः -प्रो, श्रीनिवास वरखेडी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयवाराणस्याः कुलपतिः प्रो. राजाराम शुक्लः,सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मित्रः, जगद्गुरु रामानुजाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. अनुला मौर्यः, महर्षिपाणिनि संस्कृत एवं वैदिकविश्वविद्यालयस्य (उज्जैन )कुलपतिः प्रो. पंकज जानी, केन्द्रीयसंस्कृतविश्वविद्यालयस्य, (नई दिल्ली) कुलपतिः प्रो. पीएन शास्त्री, कोल्हानविश्वविद्यालय भाखंडस्य कुलपतिः प्रो. गंगाधर पांडा चेत्यादयोऽन्ये समुपस्थिताश्चासन् ।

## मानसवेदैः,उपनिषद्भिः पुराणैश्च समन्वितो मन्त्रात्मकः ग्रन्थः पद्मश्रीविभूषितः अभिराज राजेन्द्र मिश्रः

भारतीयविद्याभवनस्य भवन्समेहताविद्यालय कौशाम्बी प्रयागराजः चेत्यनयोः तत्त्वावधाने आयोजितः 'रत्नावली महोत्सवः'




ऑनलाइनद्विदिवसीय-आयोजनं सम्पन्नम् मुख्यविषयस्य तावन्मानसतुलसी रत्नावली च।

कार्यक्रमे मुख्यवक्तृरूपेण प्रथमदिवसे अमेरिकायाः डा. बीना शर्मा स्वास्तिकमहत्त्वं साङ्गोपाङ्गं वैज्ञानिकदृष्टिकोणम् आध्यात्मिकस्वरुपञ्च निरुपयत्। अन्ये आचार्याः तुलसीदासस्य प्रेरणास्रोतं रत्नावलीं वादन्तः कौशान्बी-लोक-संस्कृत्युल्लेखं कृतवन्तः। द्वितीयदिवसे आदरणीयः गुरुणां गुरुः प्रो० अभिराज राजेन्द्र मिश्रः तुलसीदासस्य सम्बन्धे साहित्यिकसाक्ष्याणां विशदं विस्तृतञ्च विवेचितवान। स्वीयमानसिकम् आत्मीयभावं स्थापयन्

कार्यक्रमस्य अध्यक्षतां धन्यवादज्ञापनं च डॉ. रामनरेश त्रिपाठी संचालनं सुमधुरध्वनिद्वारा कौशांबीमहिम्नः गानं संस्कृते हिन्द्यां काव्यपाठं गुरूवर्यः प्रो. राजेन्द्र त्रिपाठी रसराजः अकरोत् ।डा. सुमनः, स्वामी ब्रह्मचारी , डा. लक्ष्मीकान्त मिश्रः, कविता उपाध्यायः ,अरुण कुमार तिवारी कन्हैया मिश्रः, चन्द्रकान्त त्रिपाठी, आशीष मिश्रश्चेत्यादयः उपस्थिताः । कुमुद दीवानः स्वीय-भजन-गानेन सर्वेऽपि मन्त्रमुग्धाः कृता।

## अनुकूल ढकालः संस्कृतराष्ट्रियवादविवाद- प्रतियोगीतायां प्रथमस्थानं प्राप्य काश्याः कीर्तिमानं संस्थापितवान्

वाराणसी (कृष्णा पण्डितः) । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयवाराणस्याः शास्त्रीद्वितीयवर्षस्य छात्रः अनुकूल ढकालः पुत्रः श्रीमान् मातृका ढकालः राष्ट्रियवादविवादप्रतियोगीतायाः तृतीये अन्तिमचरणे प्रथमं स्थानं प्राप्य काश्याः तत्संस्थानां च सम्मानं वर्धितवान्।



महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयकैथल-हरियाणायाः कुलपतिः आयोजकश्च प्रो. श्रेयांश द्विवेदी विशिष्टवार्तालापे बोधितवान् यत् संस्कृतक्षेत्रे उत्साहं , उल्लासम् अनुकूलताञ्च उत्पादयितुम् एतादृशप्रतियोगीतानाम् आयोजनं कृतम्। अनेन भारतीयसंस्कृतेः उत्थाने संस्कृतभूमिकायाः महत्त्वं वर्धिष्यते। तन्माध्यमेन राष्ट्रस्य उच्चपदस्थाधिकारिणां नेतघ्णाञ्चापि दृष्टिः संस्कृतभाषां विद्यार्थिनश्च प्रति सम्पतिष्यति। प्रगाढता, प्रेम प्रेरणा च जागृताः भविष्यन्ति। सममेव मानवीयतत्त्वानां वृद्धिः सामाजिकसमरसतायाः विकासश्च भविष्यति । जनैः संस्कृतं केवलं व्यवसायसम्बद्धं न चिन्तनीयम् अपितु संस्कृतमाध्यमेन राष्ट्रस्य उत्थानं जीवनदर्शनस्य योगदानाय च कार्यं करणीयम्। नवशिक्षानीत्यां भारतीयसंस्कृत्यै संस्कृताय च महत्वपूर्णं स्थानं दत्तम् । तत्र वाल्मीकिसंस्कृतविश्वविद्यालय, कैथल हरियाणा ,वैली ऑफ वर्ड्स, देहरादूनविश्वविद्यालयः इत्यनयोः संयुक्ततत्त्वावधाने, 'सत्यमेव जयते नामामृतं' विषयमधिकृत्य आयोजितस्य अन्तिमचरणस्य राष्ट्रियप्रतियोगितायां सम्पूर्णानन्द संस्कृतविश्वविद्यालयवाराणस्याः शास्त्रिद्वितीयवर्षस्य छात्रः प्रथमं स्थानं प्राप्तवान्। तदर्थं कुलपतिः आचार्य शुक्लः नोडलाधिकारी प्रो. हरिप्रसाद अधिकारी च वर्धापनानि दत्तवन्तः । ज्ञातव्यं तावद्गत 27 अक्टूबर 2020 तमे दिनाङ्के प्रारब्धायाम् अस्यां राष्ट्रियवादविवादसंस्कृतभाषायाः प्रतियोगीतायां अखिलभारतस्य 17 संस्कृतविश्वविद्यालयानां विद्यार्थिभिः सहभागिताम् निरवहन्।

प्रथमपुटस्य शेषभागः

## देववाणीपरिषदः पञ्चचत्वारिंशः स्थापनादिवससमारोहः

स्वागतभाषणमकारि । परिषत्संरक्षिकया श्रीमत्या रमाशुक्लया देववाणीपरिषदा प्रकाशितयोः प्राच्यविद्याशताब्दीयं




(श्रीरमाकान्तशुक्लकृतं) श्रीशिवराज्योदयसहजबोधः (डॉ. अभिनवशुक्लकृतः) इत्यनयोः ग्रन्थयोः लोकार्पणं कृतम् । देववाणीपरिषदः आजीवनसदस्येन डॉ. आनन्दवर्धनशुक्लेन देववाणीपरिषदः साहित्यस्य परिचयसंस्तवः कृतः । श्रीमता सञ्जयदत्तसती इत्यनेन सामवेदीयशिक्षाः आलम्ब्य स्वगभीरं व्याख्यानं दत्तम् । श्रीयुवराजभट्टराईः ऋषिराजपाठकश्च काव्यपाठम् अकुरुताम् । परिषत्संरक्षिकया ग्रन्थप्रकाशनमाश्रित्य हर्षो व्यक्तस्तल्लोकार्पणञ्च प्रशंसितम् । परिषदध्यक्षेण आचार्यरमाकान्तशुक्लेन अध्यक्षीयभाषणपुरस्सरं देववाणीपरिषत्साहित्यमाश्रित्य स्वविचाराः प्रकटिताः । संस्कृतजगतश्च दिवङ्गतौ आचार्य रवीन्द्रनागरं श्रीगोविन्दाचार्यं च प्रति श्रद्धाञ्जलिभरोऽभ्यर्पितः । पण्डितेन आशीषनारायणत्रिपाठिना श्रीजगद्धरभट्टस्तोत्रं ससंगीतं प्रस्तुतम् । परिषन्महासचिवेन ऋषिराजपाठकेन कार्यक्रमस्य सधन्यवादं सञ्चालनं कृतम् ।

(वृत्तलेखिका सुश्रीऋचा झा टङ्कणकर्ता च श्रीमान् सञ्जयदत्तसतीः )

प्रथमपुटस्य शेषभागः

## मुख्यमन्त्री अखिलभारतीय-आयुर्विज्ञानसंस्थाने, ....

आपूर्त्या अपि रोगः नियन्त्रितः । प्रदेशसर्वकारेण येन प्रकारेण मस्तिष्क-कलाशोधं नियन्त्रितं कृतम्। तावत्तेन प्रकारेण कोरोना-सङ्क्रमणम् अपि नियन्त्रितं करिष्यते । तेनोक्तं यत् प्रदेशः कोरोना-सङ्क्रमणे विजयमार्गे अग्रसरः अस्ति ।

मुख्यमन्त्रिणा उक्तं यत् समूहभावनया सह यदा कार्यं क्रियते, तदा तस्य सम्यक् परिणामाः निश्चितरूपेण परिलक्षिताः भवन्ति । अखिलभारतीय-आयुर्विज्ञानसंस्थान् अपि अनया भावनया कार्यं करणीयं भविष्यति । अखिलभारतीय-आयुर्विज्ञानसंस्थानेन केवलं गोरखपुरम् एव न अपितु अन्ये जनपदाः/प्रान्ताः अपि लाभान्विताः भविष्यन्ति । शासनद्वारा प्रत्येकस्मिन् स्तरे सहयोगाय तत्परः अस्ति । तेनोक्तं यत् तकनीकिम् उपयोक्तुं न्यूनता न वर्तनीया । कोरोनाकाले तकनीक्याः आधारे कार्यं कृतं, येन कोरोना-सङ्क्रमणे नियन्त्रणे सफलता प्राप्ता । तेनोक्तं यत् चिकित्सकाः रोगिणः प्रति औदार्यं ,संवेदनशीलत्वं च संस्थापयेयुः । रोगिभ्यः पीडया मुक्तिं दापयितुं तेषां कर्तव्यं वर्तते।

अस्मिन्नवसरे चिकित्सास्वास्थ्यमन्त्री श्रीमान् जयप्रतापसिंहः, गृहविभागीयः अवरमुख्यसचिवः श्रीमान् अवनीशकुमारः अवस्थी, मुख्यमन्त्रिणः आर्थिकपरामर्शदाता श्रीमान् के.वी.राजू, दीनदयालख्र उपाध्याय-गोरखपुरविश्वविद्यालयस्य कुलपतिः प्रो. राजेशसिंहः, गोरखपुरचिकित्सामहाविद्यालयस्य प्राचार्यः डा. गणेशश्चेत्यादिभिः सहिताः अन्ये गणमान्यनागरिकाः उपस्थिताः आसन् ।

# संस्कृतभारतीमेरठद्वारा संस्कृतसम्भाषणशिविरं समारब्धम्

लखनऊ। डी. ए. वी. महाविद्यालये बुढ़ानानगरे संस्कृतभारतीद्वारा सरलसंस्कृतसम्भाषणशिविरस्य शुभारम्भः



अभवत्। यत्र अतिथिभिः सरस्वत्याः भारतमातुश्च चित्रे पुष्पाणि समर्प्य दीपः प्रज्वलितः। मुख्यवक्तृत्वेन समागतः गौरव शास्त्री संस्कृतमहत्त्वं प्रकाशयन् वर्तमानसमये संस्कृतस्य आवश्यकतां प्रति स्वीयविचारान् प्रकटितवान्। साम्प्रतिके काले काश्चन अनुचितघटनाः घटिताः। ताः सर्वाः अपि निवारयितुं प्रत्येकं व्यक्त्या संस्कृतं स्वीकर्तुं भारतीयसंस्कृतिं जीवने समानेतुं जीवनं सार्थकं भवेत्। तेन संस्कृतस्य श्लोकानां सुभाषितानां मन्त्राणां च द्वारा संस्कृतमहत्त्वं बोधितवान्। अन्ते तेन उक्तं संस्कृतं अस्माकं स्वरूपं वर्तते। तद् रक्षितुं छात्रैः नूनमेव संस्कृतम् अध्यापनीयम्। तत्र समुपस्थितः विद्यालयस्य प्रधानाचार्यः प्रदीप कुमारः सर्वेभ्यः शुभकामनाः दत्ताः। आभारश्च प्रकटितः। अवसरेऽस्मिन् विद्यालयस्य सर्वे शिक्षकाः मनीषशास्त्री, डॉ.संगीता, डॉ. प्रदीप, डॉ. रश्मिश्च उपस्थिताः आसन्।

# 17/12/2020 तः आरप्स्यते चतुर्दशदिवसीयं संस्कृतभाषाशिक्षणप्रशिक्षणम्

तत्र प्राथमिकशिक्षायां संस्कृतभाषाशिक्षणं समुन्नेतुम् उत्तरप्रदेशसंस्कृतसंस्थानं राज्यशैक्षिकानुसंधानप्रशिक्षणपरिषद् चेत्यनयोः संयुक्ततत्त्वावधाने बेसिकशिक्षाविभागस्य उच्चप्रथमिकशिक्षकेभ्यः सञ्चायिष्यते संस्कृतभाषाप्रशिक्षणम्। तत्र संस्थानस्य मान्यः अध्यक्षः शुभारम्भे डॉ वाचस्पतिमिश्रः अभाषत यत् संस्कृतभाषायाः संस्कारः प्राथमिकशिक्षातः एव प्रभावजन्यः भवति तदर्थं आरम्भे शिक्षकाणां एतादृशभाषाप्रशिक्षणं समपेक्षते। तत्र संस्थानद्वारा २०१८/१९ तमे खिष्टाब्दे प्रतिजिल्लाशिक्षाप्रशिक्षणकेंद्रं संस्कृतवाग्व्यवहारकार्यशालाद्वारा प्रशिक्षणं कारितम्। तत्र प्रथमचक्रे पञ्चविंशतिजिल्लाशिक्षाप्रशिक्षणकेन्द्राणां पञ्चाशत्पञ्चाशद् उच्चप्राथमिकशिक्षकेभ्यः अद्‌ः प्रशिक्षणं चलिष्यति। तत्र प्रशिक्षकान् उद्‌बोधयन् प्रशिक्षणप्रमुखः श्रीमान् सुधिष्टकुमारमिश्रः प्रशिक्षणसम्बद्धशैक्षणिकोद्‌बोधनेन पाठ्यबिन्दून् उद्दिश्य शिक्षणसोपानानाम् अनुरूपं परिचर्चामाध्यमेन चर्चितवान् ।तत्र पाठ्यक्रमं सज्जीकरणे तकनीकीम् उपयुज्य कथं विषयः आकर्षकरीत्या उपस्थापनीयः तदर्थं का कल्पना तत्र करणीया इति बोधितवान्। प्रशिक्षणसमन्वयकः श्रीमान् धीरज मैठाणी संस्कृतभाषापाठनं रोचकम् आकर्षकं कर्तुं प्रशिक्षकाणां मार्गदर्शनम् अकरोत्। सर्वस्यापि कार्यक्रमस्य संयोजनं निर्व्यूढवान्।

एतस्मिन् प्रशिक्षणे प्रदेशस्य समस्तजिल्लाशिक्षा-प्रशिक्षणकेन्द्राणां शिक्षकाः प्रशिक्षणं प्राप्स्यन्ति। कार्यक्रमस्य सञ्चालनं प्रशिक्षणसंयोजकः डॉ रत्नेश्वर मणि त्रिपाठी कृतवान्। अवसरेऽमुस्मिन् प्रशासनिकाधिकारी दिनेश मिश्रः, योजना-सर्वेक्षिका डॉ. चन्द्रकला शाक्या चेत्यादिभिः सहिता समस्तप्रशिक्षकाः संस्थानस्य पदाधिकारिणः समुपस्थिताः।

# मुख्यमन्त्री गोरखपुरजनपदे महाराणाप्रतापशिक्षापरिषदः 88 तमे संस्थापकसप्ताहसमारोहसमापने कार्यक्रमं सम्बोधितवान्

उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगिना आदित्यनाथेन उक्तं यत् प्रधानमन्त्रिणः नेतृत्वे गतषड्‌वर्षेषु राष्ट्रे सकारात्मकपरिवर्तनम् आगतम्, येन समग्रं विश्वः भारतं प्रति वीक्षते। अद्य भारतस्य गणना विश्वस्य अग्रणि-देशेषु भवति। एतादृशसमये सर्वैः भारतीयैः उत्कृष्टनेतृत्वं प्रदर्शनीयं भविष्यति।



मुख्यमन्त्रिणा एषा अवधारणा अद्य गोरखपुरजनपदे महाराणाप्रतापशिक्षापरिषदः 88 तमे संस्थापकसप्ताहसमारोहसमापने कार्यक्रमस्य अध्यक्षतां कुर्वता व्यक्तीकृता। अस्मिन्नवसरे कार्यक्रमं सम्बोधयता तेनोक्तं यत् अस्माभिः स्वयमेव समाजाय देशाय च उपयोगिभिः भवितव्यम्। शिक्षणसंस्थाः समूहभावनया एवं कुर्वन्ति तर्हि एतत् सम्भवति। परिषत्सम्बद्धैः जनैः परिषदः शताब्दीवर्षपर्यन्तम् एतद् लक्ष्यं स्वीकृत्य स्वयमेव संस्था, समग्रप्रदेशम् उत्तमतया निर्मातुं निरन्तरं कार्यं करणीयं भविष्यति।

मुख्यमन्त्रिणा उक्तं यत् राष्ट्रिय-शिक्षा-नीतेः अपि एतदेव उद्देश्यम् अस्ति। सर्वेषां जनानां प्रयासेन आगामिकाले एषा परिषद् उत्तरभारतस्य सर्वश्रेष्ठतमा शिक्षणसंस्था भविष्यति। तेनोक्तं यत् वैश्विक-महामारी-कोरोना-सङ्क्रमणस्य अभूतपूर्वसङ्कटे प्रधानमन्त्रिणः नेतृत्वे यानि असाधारणानि कार्याणि जातानि तानि तकनीक्या एव साधनीयानि आसन्। भवन्तः अपि तकनीक्या सम्पृक्ताः भवन्तु। अस्याः सम्यक् उपयोगं कुर्वन्तु।

मुख्यमन्त्रिणा उक्तं यत् जनवरीमासपर्यन्तं कोरोना प्रतिरोधि औधषस्य आगमनं भविष्यति। तावत्पर्यन्तं कोविडनवाचारमानकाः पूर्ववत् अनुपालनीयाः। तेनोक्तं यत् आपद् अवसरे असफलतां सफलतायां परिवर्त्य जीवने साफल्यम् अवाप्स्यते, भवन्तः अपि प्रत्येकस्मिन् आपद् अवसरे असफलतायां सफलतायाः अन्वेषणं कुर्वन्तु। सफलता भवतां स्पर्शं करिष्यति।


संस्थापक-सप्ताहखसमापनखसमारोहे मुख्यातिथिरूपेण उपस्थितेन उत्तरप्रदेशस्य विधानसभायाः अध्यक्षेण हृदयनारायणदीक्षितेन उक्तं यत् बन्धनस्य कालखण्डं त्यजन्तु तदा भारतं वैदिककाले ज्ञानस्य पिपासितः अभवत्। एतर्थमेव तस्मै विश्वगुरोः पदम् अवाप्तम् आसीत्। गोरक्षनगर्याः अस्मिन् बहु महत्त्वपूर्णं योगदानम् अवर्तत। एषा परम्परा अधुना अपि प्रगते: अस्ति। शिक्षा एव विश्वं समाजं च उत्तमं कर्तुं मार्गः अस्ति। महाराणाप्रतापशिक्षापरिषद् द्वित्रिंशत्याधिकनवदशशततमात् वर्षादारभ्य एतदेव कुर्वती अस्ति। परिषद् स्वकीयेषु संस्थासु पुस्तकज्ञानेन साकं संस्कारान् अपि यच्छति। विशिष्टातिथिना प्रदेशस्य जलशक्तिमन्त्रिणा डॉ. महेन्द्रसिंहेन अपि कार्यक्रमः सम्बोधितः।

कार्यक्रमे जनप्रतिनिधयः, साधु-महात्मनः, शिक्षकाश्चेत्यादिभिः सहिताः छात्र-छात्राः वरिष्ठनागरिकाः उपस्थिताः आसन्।

अस्मिन्नवसरे मुख्यमन्त्रिणा योगिना आदित्यनाथेन विधानसभायाः अध्यक्षेन हृदयनारायणदीक्षितेन ब्रह्मलीन-महन्त-दिग्विजयनाथस्य महन्त-अवेद्यनाथस्य च स्मृतेः लिखितं पुस्तकं 'भारतीयसंस्कृत्याः विश्वे प्रसारः' अपि विमोचितम्। तेन महाराणाप्रताप बहुशिल्पकार्यशालायाः अनुदेशकेन श्रीमता माधवेन्द्रराजेन लिखितानि त्रीणि पुस्तकानि अपि विमोचितानि।

# रचनाकारेण अवगन्तव्यं यत् किं लेखनीयं किन्न-प्रेमजनमेजयः

बिकानेर। वरिष्ठव्यङ्ग्यकारः प्रेम जनमेजयः भाषितवान् यद् रचनाकारेण अवगन्तव्यं यत् किं लेखनीयं किन्न इति रचनाकारेण ज्ञातव्यम्। तत्र एतेन सार्धं प्रत्येकं लेखकः स्वकीयसमयं समयात् पूर्वं लेखान् च पठित्वा लेखनम् आरभेत। ततः परं पौनः पुण्येन एवं पुनरावर्तनं कुर्यात्। शनिवासरे बीकानेरनगरस्य लेखकाय डॉ. प्रोमोदकुमार चमोलीमहोदयाय व्यंग्यधारासमूहस्य हेमलतादेवीजैनसाहित्यसम्मापुरस्कारस्य २०२० प्रदानसमये एते विचाराः



मान्यः प्रेमजनमेजयः प्रकटितवान्। कार्यक्रमस्य मुख्यातिथिः साहित्यकारः पत्रकारश्च च मधु आचार्यया देशस्य व्यंङ्ग्यविधायाः छद्म-व्यङ्ग्यैः मोचयितुं अपेक्षां दर्शयित्त्वा उक्तवती यत् एतत् जाते सति एव शरदजोशीमहोदयस्य हरिशङ्करपरसाईमहोदयस्य च परम्परा सर्वदा स्थातुं शक्यते। प्रत्येकेषु क्षेत्रेषु व्यङ्ग्यकाराः निर्गच्छन्ति इति जबलपुरस्य व्यङ्ग्यकारेण रमेशसैनीमहोदयेन उक्तम्। किन्तु व्यङ्ग्यस्य कृते अधुना अत्यधिकं गाम्भीर्यं वर्तनीयम्, व्यङ्ग्यधारायाः संयोजकः डा. रमेश तिवारी व्यङ्ग्यधारासमूहस्य गतिविधीनाम् एतस्मात् आयोजनात् करोनाकाले सृजनात्मकाय लेखनाय नूतनां दिशां प्राप्ता। स्वागतभाषणे व्यङ्ग्यधारा हेमलतादेवीजैनसाहित्यसम्मानस्य रूपरेखां वदन् राजेशजोशीमहोदेन उक्तं यत् एतस्य पुरुस्कारस्य कृते निर्मितनिर्णायकानां घोषणा अन्तपर्यन्तं न भवति। उत्तमस्य व्यंग्यकारस्य कृते अत्याधिकापेक्षते यत् सः वतन् भीतः न भवेत्। कवि-कथाकारः राजेन्द्रजोशीमहोदयः उक्तवान् यत् व्यंग्यधारादृशायोजनं भवनात् न केवलं देशस्य साहित्यकाराः समिपे आगतवन्तः अपितु रचनात्मक-आदानस्य प्रदानस्य च मार्गम् अपि उद्घटितम्। एतस्मिन् आयोजनावसरे कथाकारेन नदीमअहमदमहोदेन डॉ.प्रमोद कुमारमहोदयस्य कृतित्वे प्रकाशः क्षिप्तः। सम्मानस्य प्रत्युत्तरे प्रमोदकुमारचमोलीमहोदयः उक्तवान् यन्नाटक लिखन्तः तत्र व्यंग्यं लेखितुं स्वीयपरिवेशात् प्रेरणां प्राप्नोमि। तेन उक्तं मम कृते व्यंग्य-लेखनस्य अयं राष्ट्रियपुरुस्कारः अत्यधिकः महत्वपूर्णः अस्ति एवं सर्वदा माम् प्रेरिष्यति।

# पतञ्जलिना साम्प्रतं शिक्षाक्षेत्रे आयुर्वेदस्य संस्काराणाञ्च शिक्षायै सीबीएसई इव परिषन्निर्माणाय स्वीकृतिः प्राप्ता

उदयपुरम्। पतञ्जलियोगपीठः अधुना शिक्षक्षेत्रे बोर्ड केन्द्रीयमाध्यमिकशिक्षापरिषद् इव भारतीयशिक्षापरिषदं (बीएसबी स्थापयित्वा बालानां माध्यमिक शिक्षां यावद् वेद-संस्कार-संस्कृत-नैतिकमूल्य-व्यवसायैः सह आधुनिकशिक्षां दातुं प्रभविष्यति। मंगलवासरे एकस्मिन् निजकार्यक्रमं उदयपुरं प्राप्य पतञ्जलियोगपीठस्य अध्यक्षः आचार्य बालकृष्णः भास्कराय कथितं यत् महर्षिसंदीपनीराष्ट्रियवेदविद्याप्रतिष्ठानस्य (एमएसआरवीपी) गवर्निंगकाउंसिलद्वारा गतबुधवासरे आधिकारिकरूपेण पतञ्जलेः चयनं कृतमासीत्। एतावता औपचारिकः आदेशः नायातः परन्तु परिषदे सर्वकारस्य निरीक्षणे कार्यं कर्तुं स्वीकृतिः प्राप्ता। तन्मुख्यालयः हरिद्वारे भविता। प्रवेशप्रक्रिया आरप्स्यते।भास्करः आचार्य बालकृष्णः कोरोनिलसम्बद्धं विवादं प्रति पतञ्जलेः आगामियोजनां कृषिविधेयकं प्रति प्रश्नोत्तरम् अकरोत्। तत्र आचार्यः समुदेत् यत् 100 वर्षेषु नूतना महामारी उद्भरति। तत्र अस्माभिः किं ध्यातव्यं भारते मृत्युप्रतिशतं न्यूनमिति। तत्कारणम् आयुर्वेदः

# शकीलमहोदयेन सह अन्यैरपि पञ्चभिस्संस्कृतेन शपथवचनं स्वीकृतम्

कदवातः विजित्य कांग्रेसदलस्य शकीलमहमदखानद्वारा संस्कृतभाषायां शपथवचनं स्वीकृते सम्पूर्णकेन्द्रीयकक्षः करध्वनिना गुञ्जायमानः अभूत्तत्र विपक्षीयैः सपक्षीयैश्च सर्वैरपि भृशं तत्र प्रशंसितम्। तत्सममेव सोनवर्षातः रत्नेश सदा, सीतामढ़ीतः मिथिलेश कुमारः, लालगञ्जतः सञ्जय कुमार सिंहः, रोसड़ातः विजयं प्राप्य वीरेन्द्र कुमारेणापि स्वीयं शपथवचनं संस्कृतेन पठितम्।

# सम्पादकीयम्

अये सुरभारतीसमुपासकाः बन्धवः!

सादरं वन्दे।

विश्वविश्रुता भवन्तो विद्वांसो देशस्य संस्कृतेः संस्कृतस्य च संरक्षणार्थमनुदिनं प्रयतमाना विलोक्यन्त इति प्रमोदकरं वृत्तमस्ति। वसुधैव कुटुम्बकमिति भावनया भवन्तो देशस्य सर्वविधकल्याणाय तत्पराः सन्तीति मत्वा मोमुदीति मदीयं चेतः। संस्कृतसंवादस्य अंकमिममुपायनीकुर्वती अहं प्रसीदामि। मान्याः! देशोऽयमस्माकं कृषिप्रधानो वर्तते। सर्वकारेण कृषकाणां हिताय कश्चन नियमः कल्पितो वर्तते। यस्यानुपालेन एषां सर्वविधकल्याणं भविष्यतीति सर्वकारेणोच्यते। किन्तु कृषकाः प्रबुद्धा इमे स्वतर्कद्वारा सर्वकारस्य कृषिविषयिणीं नीतिं नैव सोढुमुत्सुका लक्ष्यन्ते। अनेकदिवसेभ्यः आन्दोलनमेतेषां विकलयति मानसम्। बहुभिः प्रोच्यते यत् विपक्षिदलैरेते प्रेरिताः कृषिनीतिं न स्वीकुर्वन्ति।

अस्तु किमपि किन्तु कृषकैः साकं तादृशी वार्ता विधेया यया एते सन्तुष्टा भवेयुः। यदि सर्वकारः एतेषां कल्याणं समीहते नैते तदभिलषन्ति तदा विचार्य किमपि करणीयम्। महति शैत्ये इमे दिल्लीं निकषा विचरन्तीति ज्ञात्वा मनो न कस्य दूयते।

अपरत्र जम्मूकाश्मीरसीम्नि शत्रव उपद्रवं कुर्वन्तो वर्तन्ते। अस्माकं सैनिकैः तेषां दुष्टानां हननं क्रियमाणमस्ति। अस्यां परिस्थितौ अस्माकमपि कर्तव्यं वर्तते यत् देशभक्तिभावना प्रबला भूयात्। देशस्य नागरिकाः देशस्य समुन्नतये चिन्तयन्तु, न तु विपरीतमाचरन्त्विति।

अन्यदस्ति वक्तव्यं यत्कोरोना नाधुनापि देशात् गता। प्रधानमन्त्रिणा निगद्यते यत् शीघ्रमेव औषधमागमिष्यति। कोरोनाटीकाकरणेन रोगमुक्तिरवश्यमेव भविष्यतीति श्रुत्वा नन्दामो वयम्। अस्तु ईश्वरः सर्वेषां हितं कुर्यात्। किन्तु यावट्टीका नायाति तावन्न प्रमदितव्यमस्माभिः। गजद्वयस्य दूरता मास्केनास्यपिधानम् इति नूनमेव करणीयमिति कामये।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**मा नौ वधाय हनवे जिहीळानस्य रीरधः।**
**मा हृणानस्य मन्यवे॥२॥**

अर्थ–ईश्वर उपदेश करता है कि हे मनुष्यो! जो अल्पबुद्धि अज्ञानी जन अपनी अज्ञानता से तुम्हारा अपराध करें तुम उसको दण्ड ही देने को मत प्रवृत्त होवो और वैसे ही जो अपराध करके लज्जित हो, अर्थात तम से क्षमा करवावे तो उस पर क्रोध मत करो, किन्तु उसका अपराध सहो ॥२॥

**वि मृळीकाय ते मनौ रथीरश्वं न सन्दितम्।**
**गीर्भिर्वरुण सीमहि॥३॥**

अर्थ–इस मन्त्र में उपमालङ्कार है। हे भगवन् जगदीश्वर! जैसे रथ के स्वामी का भृत्या घोड़े को चारों ओर से बाँधता है वैसे ही हम लोग आपका जो वेदोक्त ज्ञान है उसको अपनी बुद्धि के अनुसार मन में दृढ़ करते हैं॥३॥

फिर भी उसी अर्थ को दृष्टान्त से अगले मन्त्र में सिद्ध किया है–

**परा हि मे विमन्यवः पतन्ति वस्यइष्टये।**
**वयो न वसतीरुप॥४॥**

अर्थ–इस मन्त्र में उपमालङ्कार है। जैसे उड़ाये हुए पक्षी दूर जाके बसते हैं वैसे ही क्रोधी जीव मुझ से दूर बसें और मैं भी उनसे दूर बसैं जिससे हमारा उलटा स्वभाव और धन की हानि कभी न होवे ॥४॥

फिर वह वरुण कैसा है, इस विषय का उपदेश अगले मन्त्र में किया है–

**कदा क्षेत्रश्रियं नरमा वरुणं करामहे।**
**मृळीकायोरुचक्षसम्॥५॥**

अर्थ–मनुष्यों को परमेश्वर की आज्ञा का पालन करके सब सुख और चक्रवर्ती राज्य न्याय के साथ सदा सेवन करने चाहिएँ ॥५॥

यह सोलहवाँ वर्ग पूरा हुआ। अब अगले मन्त्र में सूर्य और वायु का प्रकाश किया है–

**तदित्समानमाशाते वेनन्ता न प्रयुच्छतः।**
**धृतव्रताय दाशुषे॥६॥**

अर्थ–इस मन्त्र में उपमालङ्कार है। जैसे अति हर्ष करनेवाले बाजे बजाने में अति कुशल दो पुरुष बाजों ऋग्वेदभाष्यम् को लेकर चलाकर बजाते हैं वैसे ही सिद्ध किये विद्या के धारण करनेवाले मनुष्य से होमे हुए पदार्थों को सूर्य और वायु चालन करके धारण करते हैं॥६॥

उक्त विद्या को यथावत् कौन जानता है, इस विषय का उपदेश अगले मन्त्र में किया है–

# अर्वाचीनोऽयम् अगस्त्यः

**– डॉ. राधावल्लभत्रिपाठी**

सरस्वत्याः समाराधकाः सुविपुलं कृतिवितानं तन्वाना दृश्यन्ते संस्कृतक्षेत्रे। किन्तु एतेषु विरला एव भवन्ति पुण्यभाजो ये शब्दसामर्थ्यनार्थगौरवेण च साहित्य विशेषयन्ति। यदुक्तं भारविणा

**विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्।**
**प्रवर्तते नाकृतपुण्य-कर्मणां प्रसन्नगम्भीरपदा सरस्वती॥**

**किरातारर्जुनीयम्- 14/3/**

संस्कृतसेवासंलग्नः सारस्वतसाधकः साहित्यसुधासमस्वादनपरः श्रीमान् सुधांशुः चतुर्वेदी एतादृशेषु सभ्येषु अन्यतमत्वं भजते नः परिचयवृत्ते। अनेन यथा साहित्यसर्जनायां पाटवमाविष्कृतं तथैव अनुवादकर्मणि अपि दक्षता प्रकटीकृता।

अनेन साध नैके हलादमयाः क्षणा मया नाना नगरेषु नाना कार्यक्रमेषु व्यय गमिताः, ते स्मृतौ अव्ययाः सन्ति।

अयं महाभागः मलयालममलयमारुतं संस्कृते सञ्चारयामास। संस्कृतस्य सुरभि च केरलेषु प्रसारयामास। अयमनुवादैः कामपि अनितरसाधारणी सेवा व्यदधात् सरस्वत्याः। अनुवादेन मूलग्रन्थकारस्य महिमा वृद्धि) याति, तदीयरचनायाः वैश्विकः प्रसारो भवति। तद्यथा 1785तमे क्रिस्तुवर्षे विल्किसकृतो गीताया अङ्ग्लभाषानुवादः प्रकाश्यतां गतः। एतं च गीतानुवादं एतस्यान्ययोरोपीयभाषानुवाद वा पाठ शापेनहार–थारो–इमर्सनसदृशाः सुप्रथिताः पाश्चात्यदार्शनिकाः भारतीयतत्त्वचिन्तन सस्पृह सश्रद्ध) विभावितवन्तः। विश्वस्मिन् विश्वे चानुवादेनानेन भारतीयमनीषाया प्रतिष्ठा समधिकतरं समजनि। एङ्कैटिन दुपराँ इत्याख्येन फ्रेञ्चविदुषा दाराशिकोहस्य उपनिषदां पारसीकभाषानुवादेभ्यः लैटिनभाषानुवादो व्यधायि। अयं चानुवादो पेरिसनगरात् 1801–1802 वर्षयोः भागद्वये प्रकाशितः। पारसीकानवादस्यापि पुनरनुवादः रिक्सन इत्याख्येन विदुषा जर्मनभाषायां विधाय 1808 वर्षे प्रकाश्यतां नीतः। एतेन वैश्विकचिन्तने भारतस्य महिमा स्वीकृतिलत प्राप। एतस्मिन्नेव काले श्लेगलेन भगवद्गीताया अनुवादो विहितः, यस्यानुशीलनं हुम्बोल्ट–हेगेल–सदृशान् विद्वद्वरेण्यान् महनीयांश्च दार्शनिकान् प्राभावयत। एतैः मनीषिभिः उपनिषदा गीतायाश्च महिम्नो य उद्घोषो विहितस्तेन भारतेऽपि श्रीणां चिन्तनमाश्रित्य चेतना जागरूकता च प्रससार। राजाराममोहनराय–केशवचन्द्रसेनसदृशाः मनीषिणः उपनिषदनुशीलने प्रवृत्ताः। राममोहनरायश्च नैकासामुपनिषदामाङ्ग्ल्यामनुवादमपि चकार।

अनुवादैः देशे क्वचिन्नवजागरणम्, क्वचित् समाजे नवचेतनासञ्चारः नवीनानामभ्युदयद्वाराणामुद्घाटनं च जायते। क्वचित् विस्मृतपरम्पराः पुनराविष्क्रियन्ते, क्वचित् संस्कृतेर्मानदण्डानां पुनः प्रत्यभिज्ञा विधीयते। रामायण–महाभारतपुराणप्रभृतीनां ग्रन्थानां भारतीयभाषासु विविधैरनुवादैः समस्तं भारतराष्ट्रमध्रियत, इदानीं यावत् एकीभावं च धत्ते।

यथा नियतिकृतनियमबद्धायाः सुखदुःखमोहकस्वभावायाः उपदानादिकारणपरतन्त्राया न सर्वथा हृद्याया ईश्वरकृतसृष्टः तदनुवादभूतापि कविसृष्टिः तस्या विशिष्यते, तथैव कस्याश्चिद् भाषायाः काऽपि कृतिः अपरस्याँ भाषायामनूदिता मूलकृतेरपि क्वचित् समधिकतरं गुणवती जायते। अपरं च – यथा मूलकृतेः कवयितरि केवलं कारयित्री प्रतिभा अपेक्ष्यते, काव्यरचनानाम् अनुवादकेषु तु कारयितृभावयितृप्रतिभयोः उभयोरपि प्रकृष्टः समागम आवश्यक इति भवति। एतादृशस्य महतः समागमस्य निदर्शनभूतो वरीवर्ति सुधांशुः चतुर्वेदी। भवन्ति चात्र मम परिकरश्लोकाः

**मूल काव्यं पुष्पं परिमलसदृशा भवन्त्यनुवादाश्च।**
**साहित्यस्योद्याने रसिकभ्रमराः सदा तृप्ताः॥**
**महिमानं ते प्रापुस्त्वनुवादैः किल च कालिदासाद्याः।**
**विश्वव्याप्तां कीर्तिं राष्ट्र पुनरपि च गौरवम्॥**

मलयालमतः संस्कृते संस्कृताच्च मलयालम्भाषायां प्रभूतं प्राज्य विस्तार्य अनुवादसाम्राज्यं सुधांशुवर्यस्तस्मिन्नलकुरुते अनुवादविश्वे चक्रवर्तीपदम्। अन्यच्च उत्तरेण दक्षिणां दक्षिणया च दिशा उत्तरं युनक्ति एतस्य अनुवादकर्म। तस्मादय खलु अर्वाचीनोऽगस्त्यः। यदुक्तं महर्षिमगस्त्यमधिकृत्य

**आज्ञामेव मुनेः प्रणम्य शिरसा विन्ध्याचले स्थीयता**
**मत्युच्चौः पदमिच्छता पुनरियं नो लङ्घनीया त्वया।**
**मैनाकादिमहीध्रलव्यवसतिं यः पीतवानम्बुधि**
**तस्य त्वा गिलतः कपोलफलके क्लेशोपि नो जायते॥**

सुधांशुना चतुर्वेदिना उत्तरदक्षिणयोः संस्कृतिसामरस्ये विघ्नभूतो वैमनस्यविन्ध्यादिः विनतिं नीतः स्वकीयया अनुवादयात्रया। अगस्त्य इव अयं अनुवादचुलुके द्वयोः संस्कृत्योदिग्दर्शनं चकार। यथोक्तं कविना अगस्त्यमधिकृत्य–

**मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः।**
**येनैकचुलुके दृष्टौ तौ दिव्यौ मत्स्यकच्छपौ॥**

युक्तमेव महाकविना ओळप्पमण्णेन अयं श्लाध्यतां नीतः उत्तरदक्षिणसमागमनामके स्वोपज्ञे ग्रन्थे। एतस्य महानुभावस्य साहित्यपाथोनिधिमन्थनोत्थमनुवादकर्म सदैव समाद्रियेत सारस्वतसमाज इति समाशस्यते।

**साभार–सुधांशुप्रकाशः**

# वैदिकराष्ट्रगानम्

**–हरिदत्तशर्मा**
सहायक आचार्योऽध्यक्षश्च संस्कृतविभागस्य
देवनागरीस्नातकोत्तरमहाविद्यालये
गुलावठी बुलन्दशहरम् उत्तरप्रदेशः, 8410749324

शुक्लयजुर्वेदस्य २२तमस्य अध्यायस्य द्वाविंशे मन्त्रे वर्णिता प्रार्थना वैदिककालस्य राष्ट्रगानरूपेण प्रसिद्धा अस्ति। इयं प्रार्थना यज्ञानाम् अवसरे स्वस्तिमङ्गलरूपेण गीयते। अस्यां प्रार्थनायां राष्ट्रस्य विभिन्नघटकानां कृते सुखस्य समृद्धेश्च कामना कृता अस्ति। वेदेषु राष्ट्रस्य कल्याणार्थम् अनेकाः प्रार्थनाः सन्ति। वैदिकराष्ट्रचिन्तनस्य उदाहरणमात्रमिदम् । एषा प्रार्थना राष्ट्रस्य कृते अद्यापि तावती एव प्रासङ्गिकी वर्तते यावती तस्मिन् काले आसीत्।


**“आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥”**

**–शुक्लयजुर्वेदः २२.२२**

अर्थात् अस्माकं राष्ट्रे ब्रह्मवर्चस्सम्पन्नाः ब्राह्मणाः उत्पन्नाः भवेयुः। अस्माकं राष्ट्रे शूराः इषुसाधने कुशलाः महारथाः क्षत्रियाः उत्पन्नाः भवेयुः। यजमानस्य गावः बहुक्षीराः भवेयुः। वृषभाः भारं वोढुं क्षमाः भवेयुः। अश्वाः शीघ्रगामिनो भवेयुः । स्त्रियः सुशीलाः सर्वगुणसम्पन्नाश्च भवेयुः । रथिनो जयशीलाः पराक्रमशीलाश्च भवेयुः। यजमानाः पुत्रवन्तो भवेयुः । अस्माकं राष्ट्रे आवश्यकतानुसारं समये समये मेघाः वर्षणं कुर्युः। सस्यानि ओषधयश्च फलपुष्पान्विताः भूत्वा परिपक्वतां प्राप्नुयुः। अस्माकं योगक्षेमः उत्तमरीत्या प्रवर्तताम् इति।

हे ईश्वर ! स्वराष्ट्र में हों द्विज ब्रह्मतेजधारी।
क्षत्रिय महारथी हों अरिदल विनाशकारी॥
होवें दुधारू गौवें पशु अश्व आशुवाही।
आधार राष्ट्र की हों नारी सुभग सदा ही॥
बलवान् सभ्य योद्धा यजमान पुत्र होवें।
इच्छानुसार वर्षें पर्जन्य ताप धोवें॥
फलफूल से लदी हों औषध अमोघ सारी।
हो योगक्षेमकारी स्वाधीनता हमारी॥

## श्रद्धाञ्जलिः



समर्पितो व्याकरणज्ञानदक्षः।
तथात्मज्ञानी शास्त्रेषु दक्षः।
क्रियासु सर्वासु सदा सुदक्षः।
सोऽसौ महात्मा विगतः परोक्षम् ॥
गोविन्द नाम्ना प्रथितो सुवैदिकः।
अधीत्य आचार्यपदं प्रतिष्ठाम्।
सदैव छात्रान् समवाप्य प्रेम्णा।
अपाठयत् सोऽद्य गतः परोक्षम्॥
सम्प्रार्थयामि प्रभुमद्वितीयम्।
गच्छन्तमेनं गोविन्दवल्लभ!।
सामीप्यमेकं हि निजं प्रदाय।
कृतार्थयन्तु विगतं परोक्षम्॥

**डॉ. श्रेयांश द्विवेदी कुलपतिः**
महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः,
मौनधारा, कपिष्ठलम् (कैथल)
हरियाणा उपाध्यक्षः

# श्रीमद्भागवतमहापुराणे भक्तितत्त्वस्य पृष्ठभूमिः

**-आचार्य संदीपशर्मा**

पुण्यस्थलीभारतभूमिर्हि सरस्य भक्तिरसस्य स्निग्धया धारया सिक्ता आप्यायिता च वर्तते। भारतवर्षे भक्तितत्त्वस्यास्य अथवा भक्तिरसस्य प्रवाहोऽनादिकालतः एव प्रचलन्नास्ते। स्निग्धानुरागसम्बन्धा भावप्रवणा भक्तिरसप्लाविता बहवो विद्वांसः सन्तो महात्मानश्चानायासेन परमात्मानमवाप्य कृतकृत्यतामगुः यान्ति यास्यन्ति च।

वेदेषु स्पष्टतया भक्ति शब्दो नोपलभ्यते तथापि वेदमन्त्रेषु देवानां स्तुतिषु तैः साकं मातृ-पितृ-भ्रातृ-सुहृदादीनां स्निग्धबन्धूनां विविधप्रकारको हृदयङ्गमः सम्बन्धः स्तुतिकर्तृणामन्तःकरणेषु देवान् प्रति स्पष्टतः प्रेम्णोऽनुरागस्य वा सद्भाव व्यञ्जयति येन तदुन्मुखी भवति प्रवृत्तिः।

उपनिषत्सु च चित्तवृत्तिनिरोधात्मकेन योगेन पुष्टं साधकानां हृदयं भक्तावधिकमाकृष्टं जायते। श्वेताश्वतरोपनिषदि स्पष्टतया भक्तिशब्दस्य प्रयोगो दृष्टिपथमायाति -

**यस्य देवे पुरा भक्तिर्यथा देवे तथा गुरौ।**
**तस्यैते कथिता ह्यर्थः प्रकाशन्ते महात्मनः[1]।।**

अग्रे उपनिषत्सु प्रतिपाद्याया एव भक्तेर्विशदतया विकासो महाभारते, श्रीमद्भगवद्-गीतायाम्, श्रीमद्भागवतादिमहापुराणेषु, भक्तिसूत्रेषु वैष्णवादीनां साम्प्रदायिकग्रन्थेषु च जातः। प्राय इमे ग्रन्था: पाश्चात्यजगता सार्द्धं भारतवर्षस्य सम्पर्कात् पूर्वमेव निर्मिताः प्रामाणिक रुपेण स्वीकृताः सर्वमान्याश्च जाताः सन्ति।

भक्तिः तत्त्वस्य उत्पत्तिविषयक विवेचनं श्रीमद्भागवतस्य माहात्म्ये विवेचितमस्ति तत्र एकदा नारदयोगी यामुनं तटमापन्नो तत्राश्चर्यं दृष्टं, तद् विषयकं विवेचनमध्यायेऽस्मिन् प्राप्यते, तत्र एका तरुणी या निषण्णा खिन्नमानसाऽऽसीत् तां तरुणीं दृष्ट्वा महर्षिः नारदः अब्रवीत् यत् कासि त्वं? काविमौ? तदा सा वदति यत् -काः च इमाः नार्याः?

**अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ।**
**ज्ञानवैराग्यनामानौ कालयोगेन जर्जरा।।**
**गङ्गाद्याः सरितश्चेमाः मत्सेवार्थं समागताः।**
**तथापि न च मे श्रेयः सेविताया: सुरैरपि।।**
**इदानी श्रृणु मद्वार्तां सचित्तस्त्वं तपोधन।**
**वार्ता मे विततााप्यस्ति तां श्रुत्वा सुखमावह।।**
**उत्पन्ना द्रविडे साहं वृद्धिं कर्णाटके गता।**
**क्वचित् क्वचित् महाराष्ट्रे गुर्जरे जीर्णतां गता।।**
**तत्र घोरकलेर्योगात्पाखण्डैः खण्डिताङ्गका।**
**दुर्बलाहं चिरं याता पुत्राभ्यां सह मन्दताम्।।**
**वृन्दावनं पुनः प्राप्य नवीनेव सुरुपिणी।**
**जाताहं युवती सम्यक्प्रेष्ठरुपा तु साम्प्रतम्[2]।।**

सर्वेश्वरः सर्वशक्तिमान सर्वशासकः सर्वज्ञः ईश्वरस्य भक्त्या मानवः सकलदुर्गुणदुःखविमुक्तो भूत्वा विशुद्धो भवति योऽजन्मापि जीवेषु दयां कृत्वा पुराणेषु गीतायाञ्च कृतस्वकीय प्रतिज्ञानुसारं प्राणिनां कल्याणाय धर्मस्य स्थापनाय अधर्मस्य निराशाय, सतां संरक्षणाय सत्ययुगे मत्स्य-कूर्म-वाराह-नृसिंहरूपेण, त्रेतायां रामरूपेण द्वापरे श्रीकृष्णबलरामरूपेण, कलियुगे च बुद्ध-कल्किरूपेणावतीर्य भक्तानाह्लादयति, शास्त्रीयमर्यादां पालयति, सुखयति च समस्त लोकम् –

**यदा-यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्त्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनायनार्थाय सम्भवामि युगे-युगे[3]।।**

स एव नित्येऽविनाशी सच्चिदानन्दघनस्वरूपः सर्वव्यापकः परमात्मा भगवान बोद्धव्यः । तस्मिन् परमानुरक्तिरनन्यं प्रेम वा भक्तिर्ज्ञेया । एवञ्च जगदाधारपरमेश्वर विषयकोऽनन्योऽनुरागो भगवद्विषयकान्तः करणवृत्तिविशेषो वा भक्तिरिति प्रतिफलति । यतिवर्य श्रीमधुसूदनसरस्वतीसिद्धान्तानुसारं भगवद्भावेन द्रवीभूतस्य चित्तस्य सविकल्पा तदाकारतापत्तिरेव भक्तिर्निगद्यते । तथा हि भक्तिरसायने -

**द्रवीभावपूर्विका मनसो भगवदाकाररुपा सविकल्पा वृत्तिभक्तिः[4]।**

अत एव श्रीमद्भागवते महापुराणे
भगवद्गुणगानश्रवणमात्रेणैव भगवदभिमुखी समुद्रगामिन्या
गङ्गाया अविच्छिन्नया धारया समा चित्तस्य कामनाहीना
अविच्छिन्नागतिरेव भक्तियोगः प्रोक्तः स्वयमेव भगवता कपिलेन स्वमातरं देवहूतिं प्रति -

**मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।**
**मनोगतिरविच्छन्ना यथा गङ्गाम्भसोऽम्बुधौ।।**
**लक्षणं भक्तियोगस्य निर्गुणस्य ह्यमुदाहृतम्।**
**अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे[5]।।**

देवर्षिणा नारदेन स्वकीये नारदभक्तिसूत्रे -**सा त्वस्मिन् परमप्रेमरूपा[6]।** इति सूत्रयता परमेश्वरे परमं प्रेमैव भक्तिः प्रोक्ता।

भक्तिद्वारा ज्ञानसूर्यस्योदयाज्जीवो भगवन्तं साक्षात्कृत्य परमानन्दमनुभवन् कृतकृत्यो भूत्वा संसारचक्राद् विमुच्यते। वस्तुतोऽरूपोऽपि भगवान् भक्तानामभिलाषानुरूपमेव विभिन्नानि रूपाणि धारयन्ति। श्रीमद्भागवतानुसारेण भगवतः प्राप्तेरेकमात्रमुपायो भक्तिरस्ति। भगवद्भक्तिः भवमहार्णववारिवेगात् उद्धारिणी यमभयविनाशिनी विषयसंचितकर्मणां संहारिणी हरेः परमपदविधायिनी च।

**सन्दर्भग्रन्थसूची**

१.श्वेताश्वेतरोपनिषद्, हरिकृष्ण गोयन्दका कृत व्याख्या, गीताप्रेस, गोरखपुर, सं० २०१९
२.श्रीमद्भागवत महापुराण श्रीधरी टीका, पं० रामतेजपाण्डेय, चौखम्बा संस्कृत प्रतिष्ठान, पुर्नमुद्रित संस्करण, २०११।
३.भक्तिरसार्णव, श्री हरिहरानन्द (करपात्री जी), भक्तिसुधासाहित्य परिषद् कलकत्ता,सं०२०२५।
४.श्रीमद्भगवद्गीता,जयदलाल गोयन्दका, गीताप्रेस, गोरखपुर, २०११।
५.नारदभक्तिसूत्र, हनुमान प्रसाद पोद्दार सम्पादित गीताप्रेस गोरखपुर, सं० २०२०।

**(Footnotes)**

१. श्वेता०उ०म०६-२३
२. श्री०भा०१-४५-५०
३. गी०४.७,८
४. भ०र०
५. श्री०भा० ३-२९-११-१२
६. ना०भ०सू० २

## ।। शरणं प्रपद्ये।।

डॉ.निरंजनमिश्र

पूर्वार्जितं यदिह तत्खलु भोग्यमेव
ज्ञात्वापि भोगसमये भवतीह दुःखम्।
तद्भञ्जनाय विवशो विकलो विमुग्धो
वक्रेन्दुभूषणविभोश्शरणं प्रपद्ये।।1
शुद्धो+पि भीतमनसा भ्रमतीह कश्चित्
वीराग्रगण्य इव कश्चिदहो कलङ्की।
दृष्ट्वा द्वयोरपि दशां व्रणितान्तरात्मा
कैलाशनाथचरणं शरणं प्रपद्ये।।2
भोग्यार्जनश्रमरतस्सुखमेति कश्चित्
भोग्यस्य भोगमधिगत्य विरौति कश्चित्।
नूनं द्वयोरपि गतिं प्रविचिन्त्य मूको
योगेश्वरस्य चरणं शरणं प्रपद्ये।।3
नेत्राश्रुपानविधिनापि न दुःखनाशो
मुक्ताट्टहासविधिना न सुखागमोऽपि।
ज्ञात्वापि तत्त्वमिह दारुणदुःखदग्ध-
श्चण्डीशचारुचरणं शरणं प्रपद्ये।।4
मित्राणि सन्ति भुवने मधुहासकाले
कश्चिन्न मत्सहचरः प्रविलोक्य दुःखम्।
मित्रेष्वपीह ननु निर्जनतां गतोऽहं
सर्वेश्वरस्य चरणं शरणं प्रपद्ये।।5
वाचा भवन्ति धनिनः परितो महान्तः
कार्यानुरोधमधिकृत्य समे दरिद्राः।
सर्वं समीक्ष्य मनसाद्य निरावलम्बो
भूतावलम्बचरणं शरणं प्रपद्ये।।6
पुष्पं ग्रहीतुमधुनैव वनं प्रविष्टः
शीघ्रं पपात खरकण्टकपूर्णगर्ते।
सञ्चिन्तयन् किमिति निर्गमनाभिलाषी
विश्वेश्वरस्य चरणं शरणं प्रपद्ये।।7

## मर्यादापुरुषोत्तमो भगवान् श्रीरामो विजयते अयोध्या

**-अरविन्दः**

आदौ श्रीसरयूजले सुखमहं कृत्वा भ्रमं नौकया
चापश्यं तटमागतः कमपि तं मिश्रं विनोदाभिधम्।
श्रीरामं लिखतीव यः सहृदयः सूक्ष्माक्षरैर्लेखकश्
चौकस्मिन् मृदुकर्गदे स्वकलया श्रीरामभक्तोद्वयः।।

श्रीमद्रामविभूषिते बुधनुते श्रीरामघोषप्रिये
पश्यन्मानवमुक्तिदेमृतनिधे देवादिवन्द्ये शुभे।
मातः कल्मषनाशिनि स्वसरयूतोयाभिषेकैस्सतां
विद्याभास्करभासितेव सुखदेयोध्येरविन्दं सुतम्।

सुग्रीवस्य किला प्रपन्नविदुषां सद्दर्शनं पावनं
तीर्थेस्मिन् भवनं मया दशरथस्यालक्षितं सादरम्।
कैकेय्या भवनं सुबन्धुभरतप्रेम्णः प्रतीकं स्थलं
दर्शं दर्शमहं स्वपुण्यजफलं सम्प्राप्तवान् भाग्यतः।।

मान्यं कोविदमारेण मिलितो देवीसहायं श्रुतं
सम्प्रीतो नतवान् मुहुः कविवरं वेदार्थरक्षारतम्।
तत्पश्चात् प्रियकोसलेशसदने विश्रम्य शान्त्या क्षपां
प्रातर्जागरितः प्रयामि सरयूस्नानाय पुण्योदयैः।।

शैत्यं बाधत एव भौतिकतनुं मन्ये प्रफुल्लं मनः
किन्त्वेतद् वदतीव सत्वरमहो स्नातुं सरव्यां मुहुः।
श्रीरामं भगवन्तमद्य हृदये भक्तो निधायागतो
वन्दे मोहविनाशिनि प्रियतमेयोध्ये त्वदङ्काश्रयः।।

(भ्रमणकाव्यम्)

## "लोभः दुर्गतिदायकः"

पुराकाले गोमतीपुर–नामके नगरे कश्चित् वणिक्दम्पतिः निवसति स्म। एकदा वणिक्स्त्री कथायां ब्राह्मणमुखात् श्रुतवती यत् " यः अस्मिन् जन्मनि गोदानं करोति सः मृत्योः अनन्तरं तस्याः गोः पुच्छसाहाय्येन वैतरणीं नदीं तरिष्यति " इति। सा सायं गृहं गत्वा पतिम् एतां वार्तां श्रावितवती। वणिक् अतीव लोभी आसीत् अतः सः पूर्वं तु पत्न्याः वार्तायाः विरोधं करोति तथापि तस्याः बहु कथनानन्तरं मृण्मयीं गां दानं कर्तुं निर्णयं करोति। वणिक्पत्नी बुद्धिमती आसीत् अतः सा एकस्मिन् दिवसे स्वर्णापणं गत्वा स्वस्य सर्वाणि स्वर्णाभूषणानि विक्रीय तेषाम् एकां स्वर्णमयीं गां निर्मीय आनयति।सा गृहमागत्य गोः उपरि मृत्तिकया लेपनं कृत्वा यथा तस्याः पतिः न जानीयात् तथा स्थापयति। वणिक्दम्पतिः सप्ताहानन्तरं शुभमुहूर्ते हवनपूजादिकं कृत्वा योग्यब्राह्मणाय तां मृत्तिकया लेपितां गां पुच्छं स्पृष्ट्वा संकल्पपूर्वकं ददाति।वस्तुतः आभ्यन्तरे स्वर्णमयी सन्नपि सा गौः बहिस्तात् तु मृण्मयी एव दृश्यते स्म। अतः तस्याः पत्युः बुद्धौ सा गौः मृण्मयी एव दृश्यते स्म । कालान्तरे तयोः देहावसानं भवति। दम्पत्योः वैतरणीनदीं तर्तुं समये सा गौः नदीतीरे आयाति।तौ तस्याः पुच्छं स्पृशतः।पूर्वं तु सा मृण्मयी एव आसीत। परन्तु पश्चात् यदा सा नद्यां प्रविशति तदा तस्याः शरीरोपरि लेपिता मृत्तिका जलेन अपगच्छति। स्वर्णमयीं गां दृष्ट्वा वणिक् क्रुद्धः भवति। सः भार्यायां कोपं करोति। वणिक् स्वां पत्नीं ताडयितुं यदा हस्तं गोपुच्छात् अपसारयति तदा एव सः वैतरण्यां नद्यां निमग्नः भवति। अन्तिमे गौः वणिक्पत्नीं एव वैतरणीनदीं तारयति।

**कथासारः-**

लोभकरणेन बुद्धिः क्षीणा भवति । तदा असामयिक–कोपकारणेन व्यर्थमेव वणिक्वत् दुर्गतिः संजायते।अतः लोभः कदापि नैव करणीयः। आवश्यकतायां सत्यां वणिक्पत्नीवत् धनस्य सदुपयोगः अपि करणीयः।तेनैव सद्गतिः निश्चयेन भवति।

वैतरण्यां हि सायाति
अस्माकं सुकृताद्धि वै ।
गोदानं तेन कर्तव्यं
गावः मोक्षप्रदायिकाः।
लोभेन जायते भ्रष्टा,
बुद्धिः कल्मषहारिणी।
अतः लोभो न कर्तव्यः,
लोभः दुर्गतिदायकः

लेखकः- नूतनविष्णुरेग्मी
(प्रकृतिसाधुः) भरतपुरम् -19,नेपालम्

# संस्कृतवाङ्मये पद्मश्रीपुरस्कारेण सभाजितस्य डॉ. रमाकान्तशुक्लस्य अवदानम्

-डॉ. सूर्य प्रकाश शुक्लः
असिस्टेण्ट प्रोफेसर संस्कृत
राजकीय महाविद्यालय पलिया कलां लखीमपुर खीरी उ.प्र.

संस्कृतसाहित्यम् अत्यन्तं विशालं समृद्धं च विद्यते। प्राचीनकालादेव आरभ्य इदानीं यावत् संस्कृतस्य समृद्धा अक्षुण्णा साहित्यधारा प्रवहमाना दृश्यते। आधुनिककालेऽपि विपुलकाव्यनाटकादीनां रचना कृता अस्ति। न केवलम् आध्यात्मिकविषयेषु अपितु समकालिकविषयान् अधिकृत्य अपि सर्जना कृता अस्ति। अनेकानि महाकाव्यानि, गद्यकाव्यानि, नाटकादीनि च रचितानि सन्ति। पत्रकारिताक्षेत्रेऽपि महार्घं कार्यं प्रचलन् अस्ति। बहव्यः पत्रिकाः प्रकाश्यन्ते। डॉ0 अभिराज राजेन्द्रमिश्रः, डॉ0 राधावल्लभ त्रिपाठी, डॉ0 रेवाप्रसाद द्विवेदी, पं0 सत्यनारायण शास्त्री, प्रो0 ताराशंकर शर्मा पाण्डेयः, देवर्षिकलानाथ शास्त्री, डॉ0 हर्षदेवमाधवः, डॉ0 पुष्पा दीक्षित, डॉ0 कमला पाण्डेया, डॉ0 नवलता, जानकीवल्लभ शास्त्री, जगन्नाथ पाठकः, रामकरण शर्मा, डॉ0 पद्म शास्त्री डॉ0 रमाकान्तशुक्ल प्रभृतयः संस्कृतस्य आधुनिकाः कवयः समर्पितभावेन संस्कृतसाहित्यसाधनानिरताः सन्ति। एवं प्रकारेण वर्तमानकालेऽपि संस्कृतसेवारतैः विद्वद्भिः कविभिः महत् योगदानं दीयते।

अर्वाचीनसंस्कृतकविषु निःस्वार्थसंस्कृतसेवासमाराधनरतः, विलक्षणप्रतिभासम्पन्नः, सारस्वतचिन्तनपरायणः ख्यातिलब्धश्च कविः डॉ0 रमाकान्तशुक्लः विशेषरूपेण उल्लेखनीयः तथा तस्य महत् योगदानम् अनुशीलनीयं विद्यते। कविवरेण डॉ0 शुक्ल महोदयेन विविधविषयेषु काव्यसर्जना कृता अस्ति। अस्य कवेः जन्म चत्वारिंशदधिक एकोनविंशतितमे वर्षे दिसम्बरमासस्य चतुर्विंशति दिनांके उत्तरप्रदेशस्थ बुलन्दशहरजनपदस्य खुर्जा इत्याख्ये नगरे अभवत्। अस्य पितुः नाम पं0 ब्रह्मानन्द शुक्लः मातुश्च नाम श्रीमती प्रियम्वदा शुक्ला अस्ति। डॉ0 शुक्लमहाभागेन द्वाभ्यां पद्धत्या शिक्षाम् अलभत्। एकतः प्राच्यपद्धत्या सम्पूर्णानन्द संस्कृत विश्वविद्यालयात् आचार्य परीक्षा समुत्तीर्णा अपरतः पाश्चात्यपद्धतिमनुसृत्य आगरा विश्वविद्यालयतः स्नातकोत्तर अर्थात् एम0ए0 इति उपाधिः अधिगतः। डॉ0 शुक्लः ''जैनाचार्य रविषेण कृत पद्मपुराण एवं तुलसीकृत रामचरितमानस का तुलनात्मक अध्ययन'' इति विषयम् अवलम्ब्य आगरा विश्वविद्यालयात् पी-एच0डी0 इत्युपाधिम् अलभत्। कविरयं न केवलं संस्कृतसाहित्ये निष्णातः विद्यते अपितु पत्रकारिताक्षेत्रेऽपि सुदीर्घं गभीरम् अनुभवम् आवहति। ''अर्वाचीन संस्कृतम्'' इत्यस्याः पत्रिकायाः नियमितप्रकाशनं महानुभावस्यास्य पत्रकारिता विषये प्रत्यक्षप्रमाणत्वेन विद्यते। डॉ0 शुक्लमहाभागेन संस्कृतस्य प्रचारप्रसाराय देश-देशान्तरे नैकाः साहित्यिकयात्राः कृताः। नैकासु सभासु गोष्ठीषु सारस्वताधिवेशनेषु च अध्यक्षताम् अकरोत् तथा नैकानि शोधपत्राणि प्रस्तुतीकृतानि। काव्यक्षेत्रे कवेरस्य महती प्रतिष्ठा विद्यते। यद्यपि डॉ0 शुक्लमहोदयेन विविधान् विषयान् आश्रित्य नैकाः रचनाः कृताः। किन्तु कविरयं राष्ट्रियकविरूपेण सुप्रतिष्ठितः विद्यते। समग्रे देशे राष्ट्रियभावभरिता ''भाति मे भारतम्'' इति रचना राष्ट्रियकार्यक्रमावसरेषु छात्रैः सादरं गीयते। विद्वांसः रचनाम् इमां भृशं प्रशंसन्ति। एतदतिरिक्तं समसामयिक परिस्थितीः दृष्टौ निधाय अपि काव्यसर्जना कृता अस्ति। यथा इदानीं कोरोना कालः प्रचलति येन कोरोना इति रोगेण लोकः प्रपीडितः दृश्यते। तत्सन्दर्भेऽपि प्रशस्ताः रचनाः रचिताः याभिः सशक्तरीत्या जनजागरणं कृतमस्ति।

प्रकाशिताः ग्रन्थाः - ''जैनाचार्य रविषेणकृत पद्मपुराण और तुलसीकृत रामचरितमानस'' इत्याख्ये ग्रन्थे पद्मपुराण-श्रीरामचरितमानसयोः विशद् तुलनात्मकम् अध्ययनं कृतमस्ति डॉ0 शुक्लमहाभागेन। अनेन कविवरेण सहलेखकत्वेन उत्तररामचरितस्य प्रियम्वदा इत्याख्या व्याख्याऽपि कृता।

प्रकाशिताः काव्यकृतयः-भाति मे भारतम्, जयभारतभूमे, भाति मौरीशषम्, भारतजनताहम्, सर्वशुक्ला, सर्वशुक्लोत्तरा, आशा द्विशती, मम जननी, राजधानी रचनाः, कान्तकाव्यामृतम्, कान्तकाव्यांजलिः, प्राच्यविद्याधिवेशनम्, प्राच्यविद्याशताब्दीयम् प्रभृतयः काव्यकृतयः अस्य कवेः प्रशस्तां काव्यप्रतिभां प्रदर्शयन्ति।

नाट्यकृतयः - पण्डितराजीयम् (उत्तर प्रदेश संस्कृत अकादम्या पुरस्कृतं ध्वनिनाटकम् ), अभिशापम् (उत्तर प्रदेश संस्कृत अकादम्या पुरस्कृतं ध्वनिनाटकम् ), पुरश्चरणकमलम्, नाट्यसप्तकम्, शुचिगान्धीयम् इत्येताः प्रशस्ताः नाट्यकृतयः सन्ति डॉ0 शुक्लमहाभागस्य।

टीका ग्रन्थः- अनेन कविवरेण ''वसुमतीशतकम्'' इत्यस्य 'रमा' इत्याख्या मनोहारिणी टीका अपि विरचिता।

सम्पादिताः ग्रन्थाः-संस्कृतसुधा, संस्कृतगद्यगुच्छः, देववाणी दर्शनम्, अर्वाचीनसंस्कृत-महाकाव्यविमर्शः (प्रथमखण्डः), अर्वाचीनसंस्कृत-महाकाव्यविमर्शः (द्वितीयखण्डः), अर्वाचीनसंस्कृत-महाकाव्यविमर्शः (तृतीयखण्डः), अर्वाचीनसंस्कृत-साहित्य-परिचयः (प्रथमखण्डः), अर्वाचीनसंस्कृत-साहित्य-परिचयः (द्वितीयखण्डः), अर्वाचीनसंस्कृत-संग्रहः(प्रथमखण्डः), अर्वाचीनसंस्कृत-संग्रहः(द्वितीयखण्डः), अर्वाचीनसंस्कृत-संग्रहः (तृतीयखण्डः), अर्वाचीनसंस्कृतम् (दिल्ली संस्कृत अकादम्याः अखिलभारतीयसंस्कृतपत्रकारितासम्मानेन सम्मानितं, उत्तरप्रदेशसंस्कृतसंस्थानस्य नारदपुरस्कारेण पुरस्कृतं, 1979 ईसवीयवर्षतः सततं प्रकाशितं त्रैमासिकं पत्रम्), श्रीसत्यदेववासिष्ठकृत श्रीविष्णुसहस्रनामसत्यभाष्यम्, श्रीसत्यदेववासिष्ठकृत नाडीतत्वदर्शनम्, आधुनिकसंस्कृतसाहित्यसन्दर्भसूची, स्तुतिकुसुमांजलिः, संस्कृतपत्रिकापीयूषम् (चतुर्षु भागेषु) इत्येते ग्रन्थाः डॉ0 शुक्लमहोदयेन सुष्ठुरूपेण सम्पादिताः। एषु ग्रन्थेषु कवेः श्लाघ्यं सम्पादनकौशलं दरीदृश्यते।

अनूदिताः ग्रन्थाः-श्रीसुन्दरराजन्इत्याख्य संस्कृतकविना विरचितस्य 'अन्यापदेशकाव्यम्', श्रीहनूमत्पंचाशत् च इति काव्यद्वयस्य डॉ0 शुक्लमहाभागेन प्रशस्तः हिन्दी अनुवादः कृतः। श्रीनिधिराघवार्य इत्याख्य संस्कृतकविविरचितस्य 'शरणागतिषोडशी', 'गंगास्तुतिः' च इत्यनयोः द्वयोः ग्रन्थयोः अपि डॉ0 शुक्लमहाभागेन हृद्यः हिन्दी अनुवादः कृतः। आंग्ललेखकस्य मोहम्मद कबीर उमरवर्यस्य 'अमीना' इति रचनायाः संस्कृतानुवादः कृतः डॉ0 रमाकान्तशुक्लमहाभागेन। अनेनैव कविना संस्कृतलेखकस्य डॉ0 उमाकान्त शुक्लस्य 'कूहा खण्डकाव्यस्य' हिन्द्यां, आंग्लभाषायां च अनुवादः विहितः। श्री रईस-अहमदकृतस्य 'जलियावालाकाण्डम्' इति उर्दुनाटकस्य प्रशंसनीयः संस्कृतानुवादः कृतः। साहित्य अकादम्या प्रदत्तानां अष्टकवीनां हिन्दी-पंजाबी-डोगरी भाषासु निबद्धानां कवितानां प्रशस्तः संस्कृतपद्यानुवादोऽपि डॉ0 शुक्लवर्येण सुष्ठुरूपेण कृतः।

साम्प्रतिके काले संस्कृतपत्रपत्रिकाणां प्रकाशनं सरलं नास्ति। यतः संस्कृतपत्रिकाणां पाठकाः अपि बाहुल्येन न मिलन्ति। अतः नियमितप्रकाशनार्थं अर्थसंयोजनस्य अपि एका गभीरा समस्या विदुषां समक्षं समायाति। नैकाः समस्याः सम्मुखीकृत्य अपि डॉ0 शुक्लमहोदयेन 'अर्वाचीनसंस्कृतम्' इति पत्रिकायाः सम्पादनं प्रकाशनं च नियमितरूपेण विधीयते। अस्यां पत्रिकायां शास्त्रीयाः, सामाजिकाः समसामयिकाः विषयाः स्थानं लभन्ते। संस्कृतजगतः सुप्रतिष्ठितानां विदुषां कवीनां रचनाश्च अपि प्रकाश्यन्ते। अनेन कारणेन पत्रिकेयं सर्वथा संग्रहणीया भूयो भूयः पठनीया च भवति। वस्तुतः पत्रिकेयं राष्ट्रियपत्रिकारूपेण सहृदयैः विद्वद्भिः पाठकैः स्वीक्रियते। संस्कृतजगत्यपि नैके साहित्यसमाराधकाः कवयः समीक्षकाश्च विद्यन्ते ये अविदिताः अप्रकाशिताश्च सन्ति। अतः 'अर्वाचीनसंस्कृतम्' एकतः अज्ञातविदुषां पाण्डित्यं समाजस्य समक्षम् आनयति अपरतः तेषां विदुषां विचारान् चिन्तनं च प्रस्तौति। एवं प्रकारेण डॉ0 शुक्लमहानुभावः संस्कृतस्य प्रचारं प्रसारं च कुर्वन् संस्कृतवाङ्मयस्य श्रीवृद्धौ महद् योगदानं करोति। अस्मिन् सन्दर्भे ध्यातव्यमस्ति यत् विद्वद्वरः डॉ0 शुक्लमहानुभावः स्वकीयेन प्रयासेन तत् कार्यं सम्पन्नतां नयति यत् राजस्थान-उत्तरप्रदेश-मध्यप्रदेश-दिल्ल्याश्च अकादमीभिः स्वरमंगला-परिशीलनम्-दूर्वा-संस्कृतमंजरी इत्यादयःपत्रिकाः सर्वकारीय साहाय्येन प्रंकाश्यन्ते । अतः 'अर्वाचीनसंस्कृतम्' पत्रिकायाः सम्पादकः प्रकाशकश्च श्रीमान् डॉ0 शुक्लवर्यः सर्वथा स्तुत्यः अभिनन्दनीयश्च अस्ति। 'अर्वाचीनसंस्कृतम्' पत्रिकया संस्कृतसाहित्यस्य अध्ययनेऽपि रुचिं जागरयति डॉ0 शुक्ल महोदयः।

वस्तुतः परमेश्वरः सर्वव्यापकः विद्यते। परमात्मनं विना न कुत्रापि किमपि स्थानं विद्यते इयमस्ति वैदिकी मान्यता। ईशावास्योपनिषदि तथ्यमिदं सुस्पष्टरूपेण समुद्घोषितम् -''ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत।'' अनेन इदं सुस्पष्टं भवति यत् पृथिव्याः न केवलं मानवाः अपितु सर्वे प्राणिनः सम्माननीयाः संरक्षणीयाश्च सन्ति। सर्वैः सह मित्रभावना भवेत् इयमेवास्ति व्यापकरूपेण विश्वबन्धुत्वभावः। एषा एवास्ति भारतीया संस्कृतिः। 'मित्रस्य चक्षुषा समीक्षामहे' इत्यस्ति ऋग्वेदस्य घोषः। सूत्रमिदम् अंगीकृत्य भारतीयैः ऋषिभिः सर्वं जगत् समत्वम् अशिक्षयत् यत् समेषां समानरूपेण सम्मानं करणीयम्। जगति सभ्यतायाः विकासः अवश्यमेव अभवत् किन्तु संस्कृतेः ह्रासः दरीदृश्यते। वस्तुतः भौतिकविकासस्य नाम सभ्यता अस्ति किन्तु संस्कृतिः आध्यात्मिकानि मूल्यानि आवहति। संस्कृतेः मूले अध्यात्मसंवलिताः मान्यताः, परम्पराश्च विलसन्ति। एतादृशी अस्ति भारतीया संस्कृतिः। संस्कृतेः इमं पूतं पवित्रं परिनिष्ठितं जगत्कल्याणकरं स्वरूपं भारतीयैः कविभिः प्रभावपूर्णशैल्यां गीयते। सन्दर्भेऽस्मिन् कविवरस्य डॉ0 रमाकान्तशुक्लमहोदयस्य राष्ट्रियभावभरिता रम्या प्रशस्ता कृतिः 'भाति मे भारतम्' सर्वथा हृद्या उल्लेखनीया च विद्यते। अस्यां कृतौ भारतस्य बहुविधवैशिष्ट्ययुतं स्वरूपं वर्णयति कविः येन भारतराष्ट्रस्य गौरवं जगति चकास्ति। अस्यां रचनायां भारतस्य आध्यात्मिकं, साहित्यिकं, सांस्कृतिकं, .प्राकृतिकं च वैशिष्ट्यं वर्णितम् अस्ति येन समेषां भारतीयानां कृते प्रेरणाप्रदा राष्ट्रभक्तिः परिलक्ष्यते। कविना अनेन स्वकीयया सूक्ष्मेक्षणप्रतिभासम्पन्नया दृष्ट्या भारतस्य बहुक्षेत्रीयान् प्रसृतान् नैकान् गुणान् जनानां समक्षं प्रस्तुतम्। यद्यपि काव्यमिदं स्वतंत्ररूपेण अनुसंधानविषयत्वेन वर्तते तथापि अत्र संक्षेपेण अवसरानुकूलं शोधपत्रानुरूपं कतिपयाः विशेषताः विविच्यन्ते।

अनेकतायाम् एकता इत्यस्ति भारतस्य महद् वैशिष्ट्यम्। अत्र विविधधर्मावलम्बिनः जनाः निवसन्ति। विभिन्नाः पद्धतीः जीवनसरणीश्च अनुसृत्य सुखेन जीवनं यापयन्ति, भिन्नाः पूजापद्धतीश्च पालयन्ति किन्तु नास्त्यत्र कोऽपि विभेदः अपितु भ्रातृभावेन बन्धुत्वभावनया च परस्परं व्यवहरन्ति।भावस्यास्याभिव्यक्तिः कियती स्पृहणीया विलसति समीक्ष्यकाव्येऽस्मिन् 'भाति मे भारतम्' -

''विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत्।
विश्वमेकं कुटुम्बं समालोकयद्
भूतले भाति मेऽनारतं भारतम्।।
वेशभूषाशनोपासना-पद्धति-
क्रीडनामोद-संस्कार-वृत्यादिषु।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा
भूतले भाति मेऽनारतं भारतम्।।''

यादृशी व्यावहारिकी आध्यात्मिकी चेतना अस्माकं भारतदेशे विद्यते तादृशी अन्यत्र सुदुर्लभा एवास्ति। यतः अत्र यादृशः पदे पदे पापपुण्यविचारः कृतः तादृशः नान्यत्र दृश्यते। अस्य मूले इयं भावना निलीना तिष्ठति यत् कोऽपि कमपि न पीडयेत् तथा सत्यस्य आचरणं पालयेत्। एतदर्थं सत्यस्य व्यवहारः आवश्यकः भवति। इमाः भावनाः पोषयन्त्यः रम्याः पंक्तयः कियत्यः शिक्षाप्रदाः-

''यत्र पुण्याय मान्यं परेषां हितं
यत्र पापाय पीडा परेषां मता।
यत्र सत्यं जयं याति नैवानृतं
भूतले भाति मेऽनारतं भारतम्।।''

उदारमनस्कः कविवर्यः डॉ0 शुक्लमहोदयः स्वकीये काव्ये यत् कामयते तदस्ति भारतीया सूक्ष्मसंवेदनासंवलिता लोकमंगलमण्डिता भव्या भावना -

''शोषितो नात्र कश्चिद् भवेत्केनचिद्
व्याधिना पीडितो नो भवेत्कश्चन।
नात्र कोऽपि व्रजेद् दीनतां हीनतां
मोदतां मे सदा पावनं भारतम्।। ''

कविवरः डॉ0 शुक्लः भारतस्य प्राक् गौरवप्रतिपादनेन साकं देशस्य साम्प्रतिकीं दुर्दशामपि विचार्य खिद्यते। निश्चयेन कविः न केवलं कस्यापि राष्ट्रस्य ऐतिहासिकं गौरवं वर्णयति अपितु समकालिकीम् अभावग्रस्तां दीनहीनां स्थितिं प्रति स्पष्टरूपेण संकेतयति येन व्यवस्थासम्बद्धाः शासकीयाः जनाः समाजोत्थानाय अव्यवस्थाम् अपाकर्तुं तत्पराः स्युः। सन्दर्भेऽस्मिन् ध्यातव्यमस्ति यत् इदानीन्तने काले भारते भारतीययूनां समक्षम् एका महती समस्या विद्यते तदस्ति-वृत्तिहीनता। सुशिक्षिताः कर्मकुशलाः सन्तः अपि युवानः जीविकावसरं न लभन्ते। इयमस्ति कवेः कृते चिन्ताकरी स्थितिः-

''विलोकयामि वृत्तिहीनतामहं यदा यदा
विलोकयामि नीतिहीनतामहं यदा यदा।
नतानना गतासुका भवाम्यहं तदा तदा
इयं दशा न मेऽस्तु येन तत्सदा विधीयताम्।।
अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम्।।''

एतदतिरिक्तं भारतस्य कृते एका अपरा स्थितिरपि चिन्ताकरी विद्यते। भारते सदैव नारीणां भृशं सम्मानम् आसीत्। नार्यः देवीसदृशाः पूज्यन्ते स्म। यद्यपि इदानीमपि भारतीये समाजे परम्परापरिपालनक्रमे कन्याभोजः गृहे गृहे क्रियते किन्तु दुर्भाग्यमिदं यत् सैव कन्या यदा उद्वाहानन्तरं पतिगृहं याति तदा सा यौतुकाय प्रपीड्यते, क्वचित् हन्यते च। ईदृशीम् अवस्थां प्रति समाजस्य ध्यानाकर्षणाय स्वकाव्ये इत्थं व्यनक्ति कविः -

''यदा यदा श्रृणोम्यहं वधूविदाहपातकं
यदा यदा श्रृणोम्यहं बलात्कृतिं विहिंसनम्।
तदा तदा भवाम्यरुन्तुदव्यथाप्रपीडिता
इयं व्यथा प्रणाशमेतु येन तद्विधीयताम्।।
अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम्।।''

'रौति ते भारतम्' रचनायां विविधक्षेत्रेषु दृश्यमानां दुर्दशां वर्णयति कविवरः डॉ0 शुक्लमहोदयः। यस्मिन् देशे बालाः 'बाल भगवान्' इत्युक्त्या भगवत्स्वरूपाः मन्यन्ते तत्रैव तेषां दीनहीना दशा कविं भृशम् उद्वेदयति। समुचितं पुष्टाहारं विना दुर्बलाः बालकाः कुपोषणकारणात् दयनीयां दशां गताः। यत्र तत्र अभावग्रस्ताः बालकाः भिक्षाटनं कुर्वाणः राजमार्गेषु रेलयानेषु च दृष्टिपथम् आयान्ति येन साक्षात् राष्ट्रदेवः खिद्यते -

''रेलयानेषु भिक्षापरान् बालकान्
अंगहीनानवस्त्रान् दयोत्पादकान्।
गालिभिः पोषितान् न्यक्कृतैस्तोषितान्
वीक्ष्य चिन्तामयं रौति ते भारतम्।।''

एवं कविःसमाजे जनचेतनां जागरयति।कवेरस्य रचनाः समाजोद्धाराय महद् योगदानं कुर्वन्त्यः सहृदयानां चेतांसि समाह्लादयति।

संस्कृत वाङ्मये प्रकृतिवर्णनम् अपरिहार्यत्वेन विलसति। महाकाव्यस्य तु अनिवार्यमेवास्ति। आचार्य विश्वनाथः 'शैलर्तुवनसागराः' इति कृत्वा प्राकृतिकोपादानानां वर्णनं महाकाव्यरचनायाम् अपरिहार्य लक्षणं मनुते। वस्तुतः प्रकृतेः मनुष्यस्य च घनिष्ठः सम्बन्धः विद्यते। उभौ अन्योन्याश्रितौ विद्येते। अतः प्रकृतेः सौन्दर्यचित्रणं स्वाभाविकम् एवास्ति। भारतम् एव जगति ईदृशं प्राकृतिकसुषमावैभवसम्पन्नं राष्ट्रं अस्ति यत्र समे षड् ऋतवः पूर्णवैभवेन सह शोभन्ते। सन्दर्भेऽस्मिन् कविवरस्य डॉ० शुक्लमहोदयस्य स्थालीपुलाकन्यायेन एकं समाह्लादकरम् उदाहरणं प्रस्तूयते -

''भवति मृदुलशोभा सर्षपाणां वसन्ते
शरदि कमलराशिः प्रस्फुटो जायते च।
हरितवसनशोभां वर्द्धयन्ती पृथिव्या
विलसति तृणराजिर्यत्र वर्षर्तुकाले।।''

वस्तुतः वर्षर्तुः भारतस्य जीवनदायकः ऋतुः। अस्मिन् ऋतौ न केवलं प्राकृतिकसौन्दर्यसमृद्धिः दृश्यते अपितु जीवनधारकम् अन्नम् अपि उत्पद्यते।

डॉ० शुक्लमहाभागस्य वैदुष्यं सर्वथा प्रशंसनीयम् अस्ति। श्रीमता शुक्लेन स्वकीयेन गभीरपाण्डित्येन वाङ्मयस्य बहूपकारः कृतः। संस्कृतसाहित्यस्य प्रचारप्रसाराय आन्दोलनरूपेण निरन्तरं कार्यम् अनुष्ठितम्। संस्कृतसेवापरायणः कविरयं यथार्थरूपेण इमां सूक्तिं चरितार्थयति-'यस्तु क्रियावान् पुरुषः स विद्वान्।' अस्य महानुभावस्य ज्ञानं न केवलं स्वान्तःसुखाय अपितु भाषाप्रचाराय, संस्कृतेः विकासाय, समाजे नैतिकमूल्यानां प्रतिष्ठायै च विद्यते। वस्तुतः कविवरस्य शुक्लस्य पाण्डित्यं बहुक्षेत्रीयं विद्यते। महानुभावस्यास्य यादृशी गतिः साहित्ये, व्याकरणे, पुराणे च विद्यते तादृशी एव प्रशस्ता प्रतिभा भारतीयदर्शनस्य विविधशाखासु सम्यक् समवलोक्यते। प्रमाणत्वेन विविधविषयसम्बद्धानि कानिचित् शोधपत्राणि समीक्षाग्रन्थाश्च सन्ति।

'' जैनाचार्यरविषेणकृत पद्मपुराण तथा तुलसीकृत रामचरितमानस '', ''संस्कृतकाव्य के विकास में जैन कवियों का योगदान '' प्रभृतिभिः ग्रन्थैः शोधपत्रैः च अस्य महाकवेः जैनसाहित्यस्य गभीरम् अध्ययनं परिलक्ष्यते। काव्यशास्त्रे कविवरस्य अस्य 'संस्कृत काव्यशास्त्रे रसः,' 'हिन्दी काव्यशास्त्र की मौलिकता', 'विशेषणमाला अलंकारः एक स्थापना', 'छायावादी काव्य में बिम्बविधान' सदृशानि नैकानि शोधपत्राणि साहित्यसंसारे विलसन्ति। वस्तुतः धर्मः समेषां मानवानाम् अभिन्नांगरूपेण भवति। अतः पृथिव्यां नैके धर्माः राजन्ते। भारतं तु प्रायः समेषां धर्मावलम्बिनां संगमस्थलमेवास्ति। यद्यपि धर्मस्य मूले कोऽपि भेदः न विद्यते। सर्वे धर्माः सत्य-दया-अहिंसा-सहिष्णुता-परोपकारादिमूल्यानां समर्थनं कुर्वन्ति तथापि काले काले परस्परं विवादाः उत्पद्यन्ते। अस्य प्रमुखं कारणं धर्मविषये तात्विकज्ञानस्य अभावः एवास्ति। अतः चिन्तकाः मानवधर्मस्य सम्पोषकाः विद्वांसः स्वकीयैःगभीरैः विचारैः ग्रन्थैश्च जनानां समक्षं धर्मस्य वास्तविकं स्वरूपं विविच्य तान् बोधयन्ति सन्मार्गं प्रति नयन्ति च। अनया दृष्ट्या ''संस्कृत काव्य में सर्वधमसमभाव'' इति शोधपत्रम् उल्लेखनीयम् अस्ति। ''संस्कृत कवियों का राष्ट्रप्रेम'' इत्यादीनां शोधपत्राणाम् अनुशीलनेन ज्ञायते यत् कविः भारतीयसंस्कृतेः शाश्वतजीवनमूल्यानि प्रति कियान् संवेदनशीलः समर्पितश्चास्ति।

भारतीय वाङ्मये पुराण साहित्यस्य अत्यन्तं महत्वपूर्णं स्थानं विद्यते। पुराणेषु पुराख्यानैः भारतीय संस्कृतेः दर्शनस्य च समुन्मीलनं जातम्। अष्टादशपुराणेषु श्रीमद्भागवतं शिरोमणिः विद्यते। श्रीमद्भागवतं सरसं किन्तु साहित्यदृष्ट्या महत् क्लिष्टम् अपि विद्यते। अनेनैव कारणेन 'विद्यावतां भागवते परीक्षा' इत्युक्तिः सुतरां प्रसिद्धा। श्रीमद्भागवतपुराणमधिकृत्य छन्दोविधानदृष्ट्या समादरणीयेन कविसमीक्षकेन श्रीमता शुक्लमहोदयेन अनुष्टुप् छन्दसः विपुलमनुशीलनं कृतमस्ति। अस्मिन् सन्दर्भे 'श्रीमद्भागवत मे अनुष्टुप्' इति शोधपत्रं सुतरां श्लाघ्यं समाह्लादकं चास्ति। ध्यातव्यमस्ति यत् आधुनिके कालेऽपि संस्कृतसाहित्यसर्जना अबाधगत्या प्रचलति। महाकाव्यानि, नाटकानि, मुक्तकादीनि काव्यानि रचितानि सन्ति। एषाम् एका सुदीर्घा श्रृंखला विद्यते। आधुनिक संस्कृतकाव्यस्य समीक्षणं सर्वथा श्रमसाध्यं कार्यं विद्यते। डॉ० शुक्लवर्येण आधुनिकसंस्कृतकाव्यानां समीक्षा अपि कृता। सन्दर्भेऽस्मिन् 'प्रो० चारुदेवशास्त्रिकृत गान्धिचरितस्य समीक्षा', 'संस्कृत गीतांजलि-समीक्षणम्', 'गुजरातगौरवलहरी-समीक्षणम्', 'विवेकानन्दसार्धशताब्दीकाव्यसमीक्षणम्' प्रभृतीनि शोधपत्राणि सादरम् उल्लेखनीयानि। 'माहेश्वरसूत्रेष्वित्संज्ञकवर्णानां चयनस्यौचित्यम्' इत्याख्य शोधपत्रेण कवेः व्याकरणशास्त्रीयं प्रशस्तं ज्ञानं परिलक्ष्यते।

संस्कृतं धर्म-दर्शन-साहित्य-संगीत-विज्ञान-ओषधि-वनस्पति विविधक्षेत्राणां विपुलगभीरज्ञानराशिना अभिमण्डितं राजते किन्तु दौर्भाग्यात् साहित्यस्यास्य गभीरतायाः विषये बाहुल्येन न जानन्ति जनाः यतः संस्कृतस्य अध्ययनं प्रति रुचेरभावः दृश्यते। प्रायः जनाः संस्कृतस्य सरसतायाः विषये अपरिचिताः सन्ति। ते भाषामिमां क्लिष्टा इति मत्वा अध्ययने अनवधानाः भवन्ति। विद्यालयेषु महाविद्यालयेषु अपि शनैः शनैः अध्ययनमध्यापनं सीमितं जातम्। अद्यास्ति आवश्यकता अस्याः भाषायाः माधुर्यम् उपयोगित्वं च जानन्तु जनाः। अस्यां दिशि नैके विद्वांसः दत्तदृष्टयः बद्धपरिकराश्च सन्ति। तेषु संस्कृतसमाराधकविद्वत्सु डॉ. रमाकान्तशुक्लवर्यः अग्रगण्यः। शुक्लमहोदयस्य वाणीमाधुर्यं सरस-सरल-रचनापाटवं च सर्वथा हृदयहारिणं विद्यते। कविरयं राष्ट्रिय-अन्ताराष्ट्रिय-विश्वस्तरैः काव्यगोष्ठीभिः विचारसभाभिः सरलरचनाभिश्च संस्कृतप्रचारप्रसारकर्मणि अहर्निशं निरतः दृश्यते। सन्दर्भेऽस्मिन् 'भाति मे भारतम्' कृतिः सर्वथा श्लाघ्या। इयं रचना देश-देशान्तरे प्रसृता। इमां रचनां छात्र-छात्राः संस्कृतानुरागिणश्च अतीव प्रेम्णा गायन्ति। इयं रचना सर्वथा लोकप्रिया जाता। अस्याः रचनायाः अनेकशः आकाशवाणीतः दूरदर्शनात् च प्रसारणं जातम्। समाजे जनेषु इयं भ्रान्तिः विद्यते यत् संस्कृतभाषया नाटकानाम् अभिनयः भवितुं न शक्नोति। इयं धारणा डॉ० शुक्लमहोदयेन अनेकानि नाटकानि निर्माय तेषाम् अभिनयनिर्देशनं मंचनं च प्रस्तूय निर्मूलीकृता। सन्दर्भेऽस्मिन् पण्डितराजीयम्, अभिशापम्, पुरश्चरणकमलम्, नाट्यसप्तकम्, शुचिगान्धीयम् इत्यादीनि नाटकानि उल्लेखनीयानि सन्ति। विविधानां स्तोत्राणां मधुरं गायनं कृतं येषां ध्वनिमुद्रिकाः विनिर्मिताः सन्तिं एतदस्ति संस्कृतप्रचारप्रसारक्षेत्रे महद् व्यावहारिकं योगदानं डॉ० शुक्लवर्यस्य।

डॉ० शुक्लमहानुभावस्य संस्कृतहिन्दीसाहित्ययोः विषये व्यापकं बहुक्षेत्रीयकार्यं विद्यते। शुक्लमहोदयस्य मौलिकतासंवलितंगभीरं पाण्डित्यं महद् योगदानं च अधिकृत्य दशाधिक शोधच्छात्रैः अनुसंधानं कृतमस्ति। वस्तुतः गभीरः संस्कृतमनीषी डॉ० रमाकान्तशुक्लमहोदयः सहजः निःस्वार्थश्च संस्कृतसमाराधकः विद्यते। समादृतेन महानुभावेनानेन संस्कृतसाहित्यस्य महती सेवा कृता। डॉ० शुक्लमहोदयस्य वैदुष्यवैभवं तथा तस्य श्लाघ्यानि मौलिकसारस्वतकार्याणिसम्पादितानि नैकानि कार्याणि च समीक्ष्य विविधाः संस्थाः सर्वकाराश्च तम् अभिनन्दितवान्। सः नैकैः पुरस्कारैश्च सभाजितोऽभवत्। डॉ० शुक्लमहाभागः उत्तरप्रदेशसंस्कृतसंस्थानेन 2002 ईसवीये वर्षे कालिदास पुरस्कारेण, 2012 ईसवीये वर्षे नारद पुरस्कारेण च अलंकृतः जातः। दिल्ली संस्कृत अकादम्या संस्कृतसमाराधकसम्मानेन, अखिलभारतीयमौलिकसंस्कृतसाहित्यरचनापुरस्कारेण, संस्कृतसाहित्यसेवासम्मानेन, अखिलभारतीयसंस्कृतपत्रकारितासम्मानेन च पुरस्कृतो जातः। दिल्लीस्थ संस्कृतप्रचारकमण्डलेन कविरत्न, कविशिरोमणि, संस्कृतराष्ट्रकवि अलंकारेण च अलंकृतः। भारतसर्वकारेण 2009 ईसवीये वर्षे राष्ट्रपति सम्मानेन तथा च 2013 ईसवीये वर्षे पद्मश्री पुरस्कारेण सभाजितोऽभवत् कविवरोऽयम्। काशीस्थ अखिलभारतीयविद्वत्परिषदा महानुभावोऽयं महामहोपाध्याय इति उपाधिना समलंकृतः। विश्वविश्रुतःविद्वान् मिश्रोऽभिराजराजेन्द्रः अप्रतिमप्रतिभासम्पन्नस्य गभीरसंस्कृतसाहित्यसमाराधकस्य कविरत्नस्य डॉ० रमाकान्तशुक्लस्य वैदुष्यं संस्कृतजगतः कृते महार्घम् अवदानं च विचार्य तं 'सुरभारतीसिंहनाद' इत्युपाधिना तथा च छन्दोविधानक्रमे स्रग्विणीछन्दसिद्धकवित्वेन 'स्रग्विणीराजराज' इत्युपाधिना समलंकृतवान्। संस्कृतस्य मूर्द्धन्यकविना स्व० भास्कराचार्यत्रिपाठिना 'राष्ट्रस्वर' इत्याख्य विशेषोपाधिना डॉ० शुक्लवर्यः विभूषितः। एतदतिरिक्तं डॉ० शुक्लः साहित्याकादमीपुरस्कारेणपि अभिनन्दितः।


वस्तुतः साहित्यमनीषी कविवरः डॉ० रमाकान्तशुक्लमहोदयः संस्कृतसाहित्यस्य कृते सर्वथा समर्पितः दृश्यते। यद्यपि महानुभावोऽयं हिन्दीसंस्कृतयोः तलस्पर्शी विद्वान् विद्यते तथापि महानुभावेनानेन संस्कृतसाहित्यस्य व्यावहारिकप्रचारप्रसाराय अध्येतृणाम् अधिकाधि कसंख्यावर्द्धनाय च सततं प्रयासो विधीयते येन समाजे नैतिकमूल्यानाम् अधिकाधिकी प्रतिष्ठा भवेत्। साहित्य-व्याकरण-काव्यनाटकालंकारदर्शनादिविषये सर्वत्र अप्रतिहता गतिः विद्यते। समीक्षाक्षेत्रेऽपि बहुकार्यं कृतमस्ति। कवेरस्य एकं महत् वैशिष्ट्यं विद्यते यत् यत्र महानुभावस्य कर्तृत्वम् एकतः विदुषां शोधच्छात्राणां च कृते चिन्तनानुशीलनविषयोऽस्ति अपरतः संस्कृतविषये अल्पज्ञानां संस्कृतानुरागिणां कृतेऽपि प्रीतिकरं समाह्लादकरं चास्ति। आधुनिककाले साहित्यजगतः प्रतिष्ठितोऽयं कविर्मनीषी सुतराम् अभिनन्दनीयः प्रणम्यश्चास्ति।


ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | |
|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com


# भवसागरो गन्तव्यः




**डॉ. जोगेन्द्रकुमारः**
एसोसिएट प्रोफेसर
बी. एल. जे. एस. कॉलेज
तोशाम (भिवानी) हरियाणा


गतः पार्श्वस्थराज्ये हि सुनिर्धनः सुधीजनः ।
पूर्णतयानभिज्ञः स आसीद् गजोत्सवाय च।।1।।

वारणपटबन्धेति भवति स्म महोत्सवः।
आगत्य नगरे तस्मिन् पश्यन्त्यासन्नरस्सदा।।2।।

तुण्डे माला तदाधृत्य भ्राम्यते नगरे गजः।
द्विपेन स्थाप्यते माला यस्य कण्ठे नृपो हि सः।।3।।

सः निर्धनोपि तिष्ठञ्च पश्यति स्म महोत्सवम्।
द्विपेन स्थापिता माला तस्य दीनस्य कन्धरे।।4।।

मालां दृष्ट्वा तदा कण्ठे समारब्धो जयस्वनः।
यावच्च पञ्चवर्षाणि तदा स स्वीकृतो नृपः।।5।।

कृतो राज्याभिषेकश्च हि राजगुरुणा तदा।
समस्ता नियमा उक्ता राजविप्रेण तेन च।।6।।

पञ्चवर्षाणि यावच्च सततं शासनं कुरु।
नक्रयुतां नदीं नूनं तत्पश्चात् त्वं गमिष्यसि।।7।।

तदा यथाबलं तीर्त्वा नदीपारं गमिष्यसि।
पुरमन्यं तदा गत्वा पुनर्नैवागमिष्यसि।।8।।

श्रुत्वा वचनमेतद् हि कृतं सुमननं पुनः।
शासनञ्च करोम्यद्य भाविचिन्तां विना ननु।।9।।

पञ्चवर्षाणि यावच्च तेन कृतं सुशासनम्।
विजितानि नराणाञ्च हृदयानि न संशयः।।10।।

आसीनं कुञ्जरे कृत्वा नीतोसौ सरितं प्रति।
स्मारितं राजविप्रेण सरितो वचनं तदा।।11।।

तदा स ह्यब्रवीद्राजा चाश्रुभरितलोचनः।
मानं करोमि राज्यस्य भवतां नियमस्य च।।12।।

चलितः कथयित्वैतत् सः राजा सरितं प्रति।
जनैः रुदनमारब्धं दृष्ट्वा श्रेष्ठनृपं तदा।।13।।

विलोक्य सहसा सेतुं नद्या उपरि निर्मितम्।
भूत्वा प्रजाः प्रसन्ना हि प्रारब्धं नर्तनं कृतम्।।14।।

नद्या उपरि सेतुर्हि नृपेण निर्मितः कृतः।
नदीपारं गतो राजा बहुसुखेन सर्वथा।।15।।

किञ्चित्कालाय नूनञ्च प्राप्तं प्राणधनं सखे।
समयोयं व्ययीकृत्य गमिष्यामो वयं ननु।।16।।

निर्मितो न कृतो येन सेतुरयं सुकर्मभिः।
नरकनक्रनद्यां सः पतिष्यति न संशयः।।17।।

विनिर्मितः कृतो येन सेतुरयं सुकर्मभिः।
तरिष्यति जनो नूनं सुखेन भवसागरम्।।18।।


पाठकानां कृते सूचनाः-
कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. ४८०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-
Sanskrit samvad,
Current A/C No. 22490200000142,
Indian Overseas Bank,
Yamuna Vihar, Delhi-110053
IFC Code- IOBA0002249

# त्रिदिवसीया अन्ताराष्ट्रिय ई-शोधसङ्गोष्ठी आयोजिता

28- 30 नवम्बरं 2021 बेबिनारद्वारा

रामबचनसिंहराजकीयमहिला महाविद्यालय,बगलीपिजड़ा, मऊ अथ च मैत्रेयीमहाविद्यालयः, नवदेहली इत्यनयोः संयुक्ततत्त्वावधाने नवम्बरमासे अष्टाविंशतिदिनाङ्कतः त्रिशत्दिनाङ्कपर्यन्तं संस्कृतवाङ्मये अर्वाचीनकवीनामवदानम् इति विषयमधिकृत्य त्रिदिवसीया अन्ताराष्ट्रिय ई-शोध




सङ्गोष्ठी समायोजिता । कार्यक्रमस्य उद्घाटनं पद्मश्रीपुरस्कारेण सम्मानितैः अभिराजराजेन्द्रमिश्रैः कृतम् । अस्मिन् कार्यक्रमे अनेकेभ्यः देशेभ्यः पञ्चशताधिकाः विद्वान्सः भागं गृहीतवन्तः अथ च अशीतिः शोधपत्राणि पठितानि प्रतिभागिभिः । कार्यक्रमेऽस्मिन् भारतवर्षस्य विद्वद्धौरेयाणां मनीषिणां प्रो.अभिराजराजेन्द्रमिश्र- प्रो. रहसविहारीद्विवेदी-प्रो.हरिदत्तशर्मा-प्रो.गोपबन्धुमिश्र-प्रो. रमाकान्तपाण्डेय-प्रो.सदाशिवकुमारद्विवेदी-डॉ.निरंजनमिश्र-डॉ.शैलैशतिवारी-डॉ.अरविन्दतिवारी-श्रीकिशोरडोबरिया- श्रीपवनकुमारप्रवीणमहाभागानाम् आधुनिककवीनां व्यक्तित्वं कृतित्वं तद्वैशिष्ट्यं चाधिकृत्य अतिमहत्वपूर्णं व्याख्यानं जातम् । स्वागतं प्राचार्या डॉ. हरित्माचोपड़ा, धन्यवादकथनञ्च प्राचार्य डॉ. मुनीबशर्माद्वारा कृतम् । संचालनं च संयोजकद्वय-डॉ.अवनीन्द्रकुमारपाण्डेय-डॉ. प्रमोदकुमारसिंहद्वारा कृतम् ।


## उत्तर-प्रदेश-संस्कृत-संस्थानम् . लखनऊ

(भाषा विभाग, उत्तर प्रदेश शासन के अधीन)

**कक्ष संख्या-520, पंचम तल, इन्दिरा भवन, हजरतगंज, लखनऊ - 226001**

ई-मेल : upsanskritsansthanam@yahoo.com, वेबसाईट : upsanskritsansthanam.in

Scholarship Helpline No. & Whatsapp No. : 6388874411

**छात्रवृत्ति योजना 2020-2021**

**सूचना**

उत्तर प्रदेश संस्कृत संस्थान, लखनऊ द्वारा संस्कृत भाषा की विकास योजना के अंतर्गत उत्तर प्रदेश माध्यमिक संस्कृत शिक्षा परिषद, लखनऊ से मान्यता प्राप्त संस्कृत माध्यमिक विद्यालयों में प्रथमा (प्रथम द्वितीय एवं तृतीय वर्ष), पूर्व मध्यमा (प्रथम एवं द्वितीय वर्ष), उत्तर मध्यमा (प्रथम और द्वितीय वर्ष) में नियमित अध्ययनरत/प्रवेशित छात्र/ छात्राओं को छात्रवृत्ति प्रदान किये जाने हेतु ऑनलाइन आवेदन आमंत्रित हैं। विज्ञापन प्रकाशन की तिथि से 08.01.2021 के सायं 05 बजे तक आवेदन प्राप्त किये जायेंगे। छात्रवृत्ति आवेदन के लिए वे छात्र अर्ह होंगे, जिन्होंने पूर्व कक्षा में 60 प्रतिशत अंक से परीक्षा उत्तीर्ण की हो। प्रत्येक कक्षा के लिए निर्धारित छात्रवृत्ति की संख्या से अधिक आवेदन पत्र प्राप्त होने पर आवेदकों का चयन अंक वरीयता (मेरिट) के आधार पर किया जाएगा।

छात्रवृत्ति की संख्या, अर्हता, वार्षिक धनराशि, नियम निर्देश तथा सम्बन्धित अन्य जानकारी के लिए संस्थान की वेबसाईट www.upsanskritsansthanam.in के ऑनलाइन आवेदन मीनू बटन पर जाकर देखें।

- निदेशक


# राजकीय-संस्कृत-महाविद्यालयः, पटना विचारगोष्ठी प्रतिवेदनम्

काजीपुरम्। नवम्बरमास्य त्रयोविंशतारिकायां महाविद्यालपरिसरे 'नवीनशिक्षानीतौ संस्कृतविद्यायाः विश्वस्मिन्नपि विश्वे पुनः प्रतिष्ठापनायै अवसराः' इति विषयमाधारीकृत्य एका विचारगोष्ठी समायोजिता।



अस्यां सङ्गोष्ठ्यां परिसरीयाः आचार्याः विविधेषु पक्षेषु स्वीयान् विचारान् प्रगटीकृतवन्तः। प्राचार्यैः श्रीमद्भिः मनोजकुमारमहाशयैः संस्कृतस्य प्रचाराय प्रसाराय च महाविद्यालयस्य कार्ययोजना समुपस्थापिता। सञ्चालनं सहायकाचार्या ज्योत्स्ना महाशया कृतवती। कार्यक्रमेऽस्मिन् सहायकाचार्यः कृष्णानन्दपाण्डेयः, सहाचार्या मेधा, सहाचार्या मधुबाला, सहायकाचार्या विनीतासुप्रिया, सहायकाचार्यः शिवानन्दशुक्लश्च समुपस्थिताः आसन्।

# नवयुगकन्यामहाविद्यालयेन ऑनलाइनव्याख्यानमाला आयोजिता



लखनऊ। नवयुगकन्यामहाविद्यालयस्य संस्कृतविभागद्वारा ऑनलाइनव्याख्यानमालान्तर्गतं 26.11.20 तमे दिनाङ्के षष्ठं व्याख्यानम् आयोजितम्। डॉ. सुद्युम्न आचार्यः (निदेशकः वेदवाणीवितानं, प्राच्यशोध संस्थानं सतना मध्यप्रदेशः) 'वैदिकव्याकरणम्' इति विषयम् अवलम्ब्य स्वीयविचाराः प्रस्तुताः।

वैदिकं लौकिकं च व्याकरणं प्रति प्रकाशं प्रक्षिप्य तेन बोधितं यत्प्रातिशाख्यग्रन्थः वैदिकव्याकरणेन सम्बद्धः। पाणिनीयव्याकरणे वैदिकलौकिकयोः व्याकरणयोः नियमाः सूत्रबद्धाः। वर्तमानसमये वैदिकव्याकरणं लौकिकव्याकरणं आधुनिकभाषाविज्ञानञ्च प्रति तुलनात्मकदृष्ट्या गहनशोधः अपेक्षितः। सम्भवतः त्रिसहस्रवर्षाणां पूर्वं निरूक्ताचार्यः यास्कः यां वार्तां धातूनाम् अर्थैः सम्बद्धां कथितवान् तासु केचन शब्दाः यथा रोशनी/ रोशनादीनाम् उदाहरणं स्वीकृत्य फारसीग्रन्थेन अवेस्तया सह तुलना क्रियते चेत् ज्ञायते यद्वेदे रूच् फारसीभाषायां रुश् धातुः वर्तते। उभाभ्यां धातुभ्यां ध्वनि विज्ञानस्य रक्षा कृता। एवंप्रकार तुलनात्मकभाषा वैज्ञानिकदृष्टिकोणेन वेदानां व्याख्या करणे सहयोगी भविष्यति। सममेव स्वीयवक्तव्ये आचार्य सुद्युम्नः एतदपि स्पष्टीकृतं यद्वेदमन्त्राणां काव्येन,अलङ्कारैः, साहित्येन सह योजयित्त्वा व्याख्यां कर्तुं अर्थस्य स्पष्टतायाः नवीनतायाश्च बोधः भवति।तेन रश्मि शब्दम् उदाहृत्य रूपकालङ्कारद्वारा वेदेषु वर्णितरश्मिशब्दस्य अर्थः किरणैः सह अश्वस्य प्रग्रहः अपि कथितः। आन्तं सर्वेषां जिज्ञासां शमयित्त्वा समेऽपि स्वीयविशिष्टव्याख्यानशैल्या अभिमुखीकृताः

तत्र अवसरेऽस्मिन् संस्कृतविभागस्य अध्यक्षा कार्यक्रमसंयोजिका च डा. रीता तिवारी विदूषां वक्तघ्णां देशाद्विदेशाच्च संयुक्तानां संस्कृतानुरागिजनानां स्वागतं कृतम्। प्राचार्य डा. सृष्टि श्रीवास्तवेन विदुषः प्रति आभारः प्रकटितः। अस्मिन् अवसरे डा.वी. राजगोपालनः आस्ट्रेलियातः, प्रो. वरलक्ष्मी तेलंगानातः डा. धर्मेंद्र सिहं झांसीतः से, डा.वंदना द्विवेदी डा. अंजुला सिहं डा. अपूर्वा अवस्थी छात्र- छात्राः तत्र समुस्थिताः।

# त्रिदिवसीयः प्रशिक्षकः अभिमुखीकरणकार्यक्रमः सम्पन्नः

तत्र उत्तरप्रदेशसंस्कृतसंस्थानं राज्यशैक्षिकानुसंधानप्रशिक्षणपरिषद् चेत्यनयोः संयुक्ततत्त्वावधाने बेसिकशिक्षाविभागस्य उच्चप्रथमिकशिक्षकेभ्यः सञ्चायिष्यमाणं संस्कृतभाषाप्रशिक्षणम् उद्दिश्य त्रिदिवसीयः ऑनलाइनप्रशिक्षकाभिमुखीकरणम् आयोजितम्। तत्र संस्थानस्य मान्यः अध्यक्षः शुभारम्भे डॉ वाचस्पतिमिश्रः अभाषत यत् संस्कृतभाषायाः संस्कारः प्राथमिकशिक्षातः एव प्रभावजन्यः भवति तदर्थं आरम्भे शिक्षकाणां एतादृशभाषाप्रशिक्षणं समपेक्षते । तत्र संस्थानद्वारा २०१८/१९ तमे खिष्टाब्दे प्रतिजिल्लाशिक्षाप्रशिक्षणकेद्रं संस्कृतवाग्व्यवहारकार्यशालाद्वारा प्रशिक्षणं कारितम्। तत्र प्रशिक्षकाभिमुखीकरणे प्रत्येकस्मिन् दिवसे एकहोरात्मके सत्रद्वये प्रशिक्षणप्रमुखः श्रीमान् सुधिष्टकुमारमिश्रः प्रशिक्षणसम्बद्धशैक्षणिकोद्बोधनेन पाठ्यबिन्दून् उद्दिश्य शिक्षणसोपानानाम् अनुरूपं परिचर्चामाध्यमेन प्रशिक्षकान् अभिमुखीकृतवान् । तत्र पाठ्यक्रमं सज्जीकरणे तकनीकीम् उपयुज्य कथं विषयः आकर्षकरीत्या उपस्थापनीयः तदर्थं का कल्पना तत्र करणीया इति बोधितवान्। प्राविधिकशिक्षणद्वारा सहायकप्रशिक्षणप्रमुखः श्रीमान् सुशीलकुमारः संस्कृतभाषापाठनं रोचकम् आकर्षकं कर्तुं प्रशिक्षकाणां मार्गदर्शनम् अकरोत्। सर्वस्यापि कार्यक्रमस्य संयोजनं प्रशिक्षणसमन्वयकः श्रीमान् धीरज मैठाणी निर्व्यूढवान्।

एतस्मिन् प्रशिक्षणे प्रदेशस्य समस्तजिल्लाशिक्षाप्रशिक्षणकेन्द्राणां शिक्षकाः प्रशिक्षणं प्राप्स्यन्ति। कार्यक्रमस्य सञ्चालनं प्रशिक्षणसंयोजकः डॉ रत्नेश्वर मणि त्रिपाठी कृतवान्। अवसरेऽमुस्मिन् प्रशासनिकाधिकारी दिनेश मिश्रः, योजना-सर्वेक्षिका डॉ. चन्द्रकला शाक्या समस्तप्रशिक्षकाः संस्थानस्य पदाधिकारिणः समुपस्थिताः ।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलः- डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2018-20 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।